नं० ४३१३ — घ

माधवीय जैमिनीन्यायमाला — विस्तर प्रथमाध्यायः

पत्राणि-३२

नं० ४३१२-घ

माधवीयजैमिनिन्यायमालाविस्तर प्रथमाध्यायः

नं. ४३१२-घ

पत्राणि ३२

श्री मो[illegible] करण

33

॥श्रीगणेशाय नमः॥ न्यायमालाया आदौ स्वकीयग्रंथस्य ननायस्वमुद्रारूपमनेकार्थगर्भं देवतानमस्कारप्रतिपादकं पठति॥
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥१॥ इष्टदेवतां नमस्कृत्य चिकी-
र्षितार्थप्रतिपालनाय पालकेनाभिनिविद्यमानं महिमानमनुस्मारयति। युक्तिं मानवतीं विदन्नृस्थिररुचुतिमेदेवि-
शेषार्थभागाग्रहोहः क्रमकृत्सयुक्तिनिपुणः श्लाघ्यातिदेशोन्नतिः नित्यं स्फूर्त्यधिकारवान् गतसदाबाधः स्वतंत्रेश्वरो
यो जागर्ति श्रुतिमस्तकसंगचरितः श्रीबुक्कणक्ष्मापतिः॥२॥ अत्र चिकीर्षितधर्मशास्त्रोवर्तमानानां द्वादशानामध्या-
यानां ये प्रतिपाद्या अर्था ये च नीतिशास्त्रोक्ता राजधर्मास्ते सर्वेप्यस्मिन्नभिप्रेतौ उपलक्ष्यंते। नीतिपक्षे। युक्तिर्योगः सं-
धिः सा च युक्तिर्मानवती मानः सत्कारः चतुर्षु सामभेददानदंडेषु उपायेषु प्रथम उपायः। वैरिणो बुद्धिभेदो द्विती-
यः। एताभ्यां दानदंडावप्युपलक्ष्येते। एतैश्चतुर्भिरुपायैर्विशेषेणार्थधनं भजन्निति प्राप्नोति एतावता शुश्रूषयः व-
र्धितः। अवशिष्टेन स्वराज्यप्रतिपालनप्रकारः प्रतिपाद्यते। अमात्यप्रभृतिषु पुरुषेषु अयमीदृशः स्य व्यापार-
स्य योग्यो नान्यस्येति एवमूहापोहकुशलः। राजसभायामेते तपस्विनः स्व्याऽधिपादद्विजा भागे उपवेशनीयाः
एते च मस्थावामभागे इति क्रमं करोति। तत्र स्मृतिषु विहितानां पुरुषानुचितबुद्धिप्रदानेन प्रयोक्तुं निपुणः समुद्र

पर्यंतत्वेनास्ति बहुलस्य देशस्योन्नतिः समस्तभोग्यवस्तुसंपत्तिः सा च परराष्ट्रनिवासिभिः सकलप्राणिभिः श्लाघ्यते । दूरं कर्त
व्यमिदं नेत्येवं कार्याकार्यविषया स्फूर्तिस्तस्या मधिकारो यस्य राज्ञो नित्यः सर्वत्राप्रतिहतबुद्धित्वात् । गतो विनिवारितः स
तत पक्षिणामाबाधो विघ्नो येन असौ गतसदाबाधः । द्विषां तदधिपतीनां राज्ञामेतदधीनत्वेनापरप्रेष्यत्वात् यं स्वतंत्रः
जगदीश्वरस्य विद्यातीर्थमुनेर्योगमूर्तित्वेनायमीश्वरः । यस्य सभायां गोष्ठीरूपप्रसंगो वेदार्थविषयत्वेन श्रुतिमात्र
पदीयं चरितमपि निरंतरं वेदोक्तरहस्यार्थानुष्ठानरूपत्वेन श्रुतिमद्भवति सोयं श्रुतिमत्प्रसंगचरितः । एवं विधो बुक्क
क्ष्मापतिरंतः परमेश्वरध्याने बहिः प्रजापालने च नित्यं जागर्तीयर्थानीति शास्त्रोक्तेषु सामभेदादिषु अयं कुशलः त
था सर्वज्ञावतारत्वात् धर्मशास्त्रोक्तेषु प्रमाणादिप्रसंगेषु अध्यायार्थेषु कुशलः । ते च अध्यायार्थाः उपरिष्टात् द
र्शयिष्यंते । तादृशः सर्वज्ञत्वं सोपपत्तिकं प्रकटयति । यद्ब्रह्म प्रतिपाद्यते प्रगुणोपक्रतत्सच्चमूर्तिप्रथांतत्रायं स्थिति
मूर्तिमाकल्पयति श्रीबुक्कक्ष्मापतिः विद्यातीर्थमुनिस्तदात्मनि लसन्मूर्तिसत्त्वानुग्राहिका तेनास्य स्वगुणैरख
डितपदं सार्वज्ञ्यमुद्योतते । सर्वास्वुपनिषत्सु प्रतीयमानं यत्परं ब्रह्म तदेव शैवागमेषु सृष्टिस्थितिसंहारतिरोध
नानुग्रहलक्षणपंचकृत्यसिद्ध्यर्थमीशानतत्पुरुषाघोरवामदेवसद्योजातलक्षणानां पंचानां मूर्तीनां प्रथां

जा

२

प्रसिद्धिं विस्तारं वा प्रगुणयति प्रकटीकरोतीति प्रतिपाद्यते। तत्र तासु मूर्तिषु यं भूपालः स्थितिमूर्तिं धत्ते तस्यां मूर्तेस्तत्संनि
धिसंनिधिविद्यातीर्थमुनिः कृत्स्नस्य जगतोनुग्राहिका मूर्तिरित्युच्यते। यस्मादयं भूपो वेदेनोक्तं पुरं भ्रमनयस्मा आगमो
क्ता महेश्वरस्य स्थितिमूर्तिः यस्माच्च श्रीविद्यातीर्थमुनिस्तदात्मनि स्वं संनिधाय प्रकाशते तस्मात्सर्वज्ञत्वमस्यरा
ज्ञ उत्कर्षेण विद्वद्गगनमार्गोपालम्भविवादे न प्रतिभासते। उक्तगुणोपेतस्य राज्ञो मंत्रिणं नानाप्रसिद्धदृष्टान्तेन
हितकारितया प्रशंसति इन्द्रस्याङ्गिरसो नलस्य सुमतिः शैब्यस्य मेधातिथिर्धौम्यो धर्मसुतस्य वैण्यनृपतेः
स्वौजा निमेर्गौतमिः। प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो यद्वत्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा मा
धवः। सरवल्गुप्राज्ञजीवातुः सर्वशास्त्रविशारदः। अकरोज्जैमिनिमतेन्यायमालां गरीयसीम्॥ तां प्रशस्य सभा
मध्ये वीरश्रीबुक्कभूपतिः। कुरु विस्तरमस्यास्त्वमिति माधवमादिशत्। स भव्यात् भारतीतीर्थयतीन्द्रचतुरा
ननात्। कृपामव्याहतां लब्ध्वा परार्ध्यप्रतिभोऽभवत्। निर्माय माधवाचार्यो विद्वदानन्ददायिनीं। जैमिनीयन्या
यमालां व्याचष्टे बालबुद्धये। चिकीर्षितं ग्रन्थे श्रद्धातिशयमुत्पादयितुं कर्तृगौरवं प्रकटयति श्रुतिस्मृतिसदाचार
पालको माधवो बुधः। स्मार्तव्याख्याय सर्वार्थं द्विजार्थं श्रौतसंग्रहतः। सर्ववर्णाश्रमानुग्रहाय पुराणसारपराशर

२५

स्मृतिव्याख्यानादिना स्मार्तो धर्मः पूर्वं व्याख्यातः इदानीं द्विजानां विशेषानुग्रहाय श्रौतधर्मव्याख्यानाय प्रवृत्तः ग्रंथमादि
स्तुर्दिक्म स्तुपाधिकं सकलवेदशास्त्रप्रवर्तकत्वेनाभीष्टेष्टदेवतारूपं परमेश्वरमादौ नमस्कृत्य श्रौतप्रवृत्तिसिध्यर्थं
विषयप्रयोजने दर्शयन्कृतं ग्रंथं प्रतिजानीते । प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं । जैमिनीयन्यायमाला श्लोकैः सं
गृह्यते स्फुटं । जैमिनिप्रोक्तानि धर्मनिर्णायकान्यधिकरणानि न्यायाः तेस्य ग्रंथस्य विषयः । पठितुं सुशकैः कतिपये
देव श्लोकैः तेषां स्फुटीभावः प्रयोजनं न्यायमाला संगृह्यत इति ग्रंथनामनिर्देशपूर्विका प्रतिज्ञा तस्य ग्रंथस्य
प्रकारं दर्शयति एको विषयसंदेहपूर्वपक्षावभासकः । श्लोकोपरस्तु सिद्धांतवादी प्रायेण कथ्यते । चत्वारोवयवा
एकश्लोकेनोक्ताः क्वचित्क्वचित् । यत्र क्वापि बहुश्लोकैरुच्यंते तत्र तेन विस्तरः । एकैकस्याधिकरणस्य विषयः संदेहः सं
गतिः पूर्वपक्षः सिद्धांतश्चेति पंचावयवाः । तत्र संगतिरनंतरमेव व्युत्पादयिष्यमाणेन प्रकारेण प्रत्यधिकरणं स्वयमे
वोहितुं शक्यते अवशिष्टानां चतुर्णामवयवानां संग्राहकाः क्वचिद्द्वौ श्लोकाः क्वचिदेकः आवापोद्वापाभ्यां अंततः
प्रत्यधिकरणं श्लोकद्वित्वे संख्यापर्यवस्यति । अतो बाहुल्याद्विस्पष्टता ग्रंथगौरवशंकानकर्तव्या । तमेव ग्रंथबाहुल्याभा
वं स्फुटीकुर्वन्नरूपकव्याजेन सुबोधत्वं दर्शयति । सर्वथापि सहस्रे द्वे नाधिकामति संग्रहः । मीमांसासागरस्नेनक्रीडापु

कारिणी भवेत्। श्लोकेन श्लोकार्धेन श्लोकैर्वा यथासंभवं न्यायसंग्रहः कृतः सर्वथापि सहस्रन्यायसंग्रहरूपो ग्रन्थः श्लोकसहस्रद्वयपूर्ते
र्वागेव समाप्यते। ननु सहस्रद्वयमतिक्रामति। भाष्यटीकादीनां बृहत्त्वाद्दुरवगाहित्वाच्च मीमांसाशास्त्ररसमाधुर्यमासी
त्क्रियमाणेन त्वनेनैव ग्रन्थेन दोषद्वयरहितेन स्वल्पपुण्यानां क्रीडार्थं निर्मितया नाभिदघ्नपुष्करिण्या समा भविष्यति यद्य
पि शास्त्रदीपिकादौ क्वचित्क्वचित्संग्रहश्लोकोऽस्ति तथापि न सर्वत्र विद्यते यत्रास्ति तत्रापि विषयसंशययोः संग्रहा
न्न श्लोकपाठमात्रेणाधिकरणमुपन्यस्तुं शक्यते अतो न क्वापि गतार्थत्वं शंकनीयं संगतिं व्युत्पादयति शास्त्रेऽध्या
ये तथा पादे न्यायसंतते गेयस्त्रिधा। शास्त्रादिविषये ज्ञाते तत्र संगतिरूह्यतां। शास्त्रसंगतिरध्यायसंगतिः पाद
संगतिश्चेति त्रिविधा संगतिः। सा च शास्त्रादीनां त्रया[illegible]णामसाधारणे विषये ज्ञाते सति स्वयमेवोहितुं शक्या शा
स्त्रस्याध्यायानां चासाधारणं विषयं दर्शयति। धर्मो द्वादशलक्षण्यां व्युत्पाद्यस्तत्र लक्षणैः प्रमाणभेदशेष
त्वप्रयुक्तिक्रमसंज्ञकाः अधिकारोऽतिदेशश्च सामान्येन विशेषतः ऊहो बाधश्च तंत्रं च प्रसंगश्चोदिताः क्रमा
त्। लक्षणान्यध्यायाः द्वादशानां लक्षणानां समाहारो द्वादशलक्षणी तादृशस्य द्वादशाध्यायोपेतस्य शास्त्र
स्य धर्मो विषयः प्रमाणादयः प्रसंगान्ता द्वादश पदार्थाः क्रमाद्द्वादशानामध्यायानां विषयाः। प्रथमेऽध्याये वि

ध्यर्थवादादिरूपं प्रमाणं निरूपितं। द्वितीये यागदानादिकर्मभेदः। तृतीये प्रयाजादीनां दर्शपौर्णमासाद्यर्थत्वेन तच्छेषत्वं। चतुर्थे गो
दोहनस्य पुरुषार्थत्वप्रयुक्त्यानुष्ठानं न तु क्रत्वर्थत्वप्रयुक्त्येत्येवमादयः। पंचमे क्रमनियतिविधेयत्वादयः। षष्ठे कर्त्रधिकारो
नान्धादेरित्यादयः। सप्तमे समानमितरच्छ्येनेनेत्यादिप्रत्यक्षवचनेनाग्निहोत्रादिनामानुमितवचनेन च सामान्यतोतिदेशः। अ
ष्टमे सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यत्र निर्वापस्तद्धितेन देवतानिर्देशात् एकदेवतात्वमौषधद्रव्यकत्वमित्यादिलिंगेनाग्नेयपुरोडाशेति
कर्तव्यतैव नान्यस्येत्येवमादिविशेषतोतिदेशः। नवमे प्रकृतावग्नये जुष्टं निर्वपामीति पठिते मंत्रे विकृतौ सौर्ये चराव
ग्निपदपरित्यागेन सूर्यपदप्रक्षेपेण सूर्याय जुष्टं निर्वपामीत्येवमाद्यूहः। दशमे कृष्णलेषु चोदकप्राप्तस्यावघा
तस्य वितुषीकरणासंभवेन लोप इत्येवमादिर्बाधः। एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्र
याजाद्यंगेनोपकार इत्यादि तंत्रं। द्वादशे प्रधानस्य पशोः उपकारायानुष्ठितेन प्रयाजाद्यंगेन पश्वंगपुरोडाशे
ष्युपकार इत्यादिः प्रसंगः। पादानामप्यवान्तरविषयं दर्शयति। विध्यर्थवादस्मृतयो नाम चेति चतुर्विधं ।
प्रथमाध्यायगैः पादैश्चतुर्भिर्मानमीरितं। प्रथमे पादे विधिरूपं मानमीरितं। द्वितीये अर्थवादरूपं। अर्थ
वादेति मंत्रस्याप्युपलक्षकः। तृतीये स्मृतिरूपं स्मृतिराचारमप्युपलक्षयति। चतुर्थे उद्भिच्चित्रादिनामरूपं॥

उपोद्घातः कर्मभेदमानं तच्छेषापवादश्च । प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः । द्वितीयाध्यायस्य प्रथमे पादे आख्यात
मेवापूर्वबोधकमपूर्वसद्भावेद्यसादिकः कर्मभेदचिंतोपयुक्त उपोद्घातो वर्णितः । द्वितीये धातुभेदपुनरुक्त्या
दिभिः कर्मभेदः । तृतीये ऽर्थं तस्य दीनां कर्मभेदप्रामाण्यापवादः । चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः । श्रु
तिर्लिंगं च वाक्यादि विरोधप्रतिपत्तयः । अनारभ्योक्तिर्बहूर्थ स्वाम्यर्थाष्टपादगाः । तृतीयाध्यायस्य प्रथमे पा
दे शेषत्वबोधकानां श्रुतिलिंगादीनां मध्ये श्रुतिर्विचारिता । द्वितीये लिंगं । तृतीये वाक्यप्रकरणादि । चतुर्थे
निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसद्भावः । पंचमे प्रतिप
त्तिकर्माणि षष्ठे नारभ्याधीतानि । सप्तमे बहुप्रधानोपकारकप्रयाजादीनि अष्टमे याजमानानि । प्रधान
स्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता । फलचिंता जघन्यांगचिंतेत्येते चतुर्थगाः । चतुर्थाध्यायस्य प्रथमे पादे प्रधा
नकृता आमिक्षा दध्यानयनस्य प्रयोजिकेत्यादि प्रधानप्रयोक्तृत्वं विचारितं । द्वितीये त्वप्रधानं वत्सापाकरणं शा
खाछेदे प्रयोजकमित्यादि अप्रधानप्रयोक्तृत्वं तृतीये जुहूपर्णमयीत्यादेः पापश्लोकश्रवणादि फलभावाभाव
चिंता चतुर्थे राजसूयगतजघन्यांगाक्षद्यूतादिचिंता श्रुत्यादिभिः क्रमस्तस्य विशेषो वर्धनो श्रुत्यादेर्बल

ता चेति पंचमाध्यायपादगाः। पंचमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः। द्वितीये वाजपेयगतेषु सप्तदश
सुपशुषु एकैकधर्मसमापनमित्यादि क्रमविशेषः। तृतीये पंच प्रयाजादीनामावर्तनेनैकादशत्वमित्यादि वृद्धिः। अदाभ्यग्रहविशेण्यो
ऽनारभ्य इत्यादि वृद्ध्यभावः। चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्बलभावः। अधिकारी तस्य धर्माः प्रतिनिधिरर्थलो
पनं। दीक्षासत्रदेयवह्निषष्ठपादेषु मीमांसिताः। षष्ठाध्यायस्य प्रथमे पादे कर्माधिकारः कर्तुरस्य पादेनास्ति स्त्रिया अस्तियोऽस्ति स
च पत्न्या सहैवेत्येवमादिनाधिकारी निरूपितः। द्वितीये सत्राधिकारिणां प्रत्येकं फलस्वत्वं फलं दर्शपूर्णमासयोः कर्तैक्यनियमः काम्य
कर्मसमापनीयमित्येवमादयोऽधिकारिधर्माः। तृतीये द्रव्यस्य प्रतिनिधिरस्ति देवादीनां मन्त्यादीनामधिकारिणश्चास नासादीनां
नास्तीत्यादि निरूपणं। चतुर्थे पदार्थलोपनं विचारितं अवत्तनाशे सत्याज्येन यजेदिडार्थस्य नाशे सति शेषान्नयाज्य
मित्यादिकं। पंचमे कालापराधेन चंद्रोदये सति अभ्युदयेष्टिः प्रायश्चित्तं। ज्योतिष्टोमस्यैका[illegible]दयो दीक्षा द्वादशाहस्य द्वाद
शदीक्षा इत्यादि निरूपितं। षष्ठे सत्राधिकारिणस्तु ब्राह्मणा एव सत्रं विप्रस्यैवेत्येवमादिकं चिंतितं। सप्तमे पित्रादिकं न दे
यं महाभूमिर्न देयेत्येवमादिर्देयविचारः। अष्टमे लौकिकाग्नावुपनयनहोमः स्थपतीष्टिस्तत्रैवेत्येवमाद्यग्निविचारः कृतः।
प्रत्यक्षोऽनुमितो देशोऽस्य शेषः सामनिरूपणात्। नामलिंगातिदेशौ हि सप्तमाध्यायपादगाः॥ सप्तमाध्यायस्य प्रथमे पादे समा
नमितरच्छ्येनेनेत्यादि प्रत्यक्षवचनातिदेशः। द्वितीये रथंतरशब्देन गानमात्राभिधायिना गानस्यैवातिदेशस्त्वमित्येतादृशः

5

सर्वोऽत्रातिदेशस्य शेषो विचारितः। तृतीये ऽग्निहोत्रनामातिदेशः। चतुर्थे निर्वचौषधद्व्यादिलिंगातिदेशः। स्पष्टलिंगाद्यास्पष्टस्य बलादपवा-
दतः। अतिदेशविशेषाः स्युरष्टमाध्यायपादगाः। अष्टमस्य प्रथमे पादे स्पष्टेन लिंगेनातिदेशविशेषः तद्यथा सौर्यचरावतिदेशो
निर्निर्वापस्तद्धितेन देवतानिर्देश एकदेवतात्वमित्यादीनि सप्तदशान्याग्नेयलिंगानि द्वितीये त्वस्पष्टेलिंगेनातिदेशः तद्यथा वाजिने हविः
सामान्येन लिंगेन पयोविध्यंतोऽतिदिश्यते। तत्र लिंगमस्पष्टं शीघ्रं तद्बुध्यनुसारतात्। तृतीये प्रबलेन लिंगेनातिदेशः तद्यथा आ-
भिचारिके चोदकानामाग्नावैष्णवसारस्वतबार्हस्पत्येषु हविष्षु त्रित्वेन लिंगेन यथाक्रममाग्नेयादिविध्यंते प्राप्ते द्विदेवत्यत्वेन लिंगेन प्रथ-
ममाग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यंतोऽतिदिष्टः प्रबलेन चाद्विदेवत्यत्वं शाब्दो ऽत्र प्रमाणमासहस्राप्रतिभासात् क्रमस्तु विल-
म्बितप्रतीत्याद्दुर्बलः चतुर्थे दर्विहोमेष्वतिदेशोऽपोद्यते तद्वारं भोऽथ सामोहो मंत्रोहस्तत्प्रसंगजः। नवमाध्यायपादेषु चतुर्ष्वेते प्रकी-
र्तिताः। नवमाध्यायस्य प्रथमे पादे ऊहोपोद्घातः सर्वकर्मसूहविचारप्रारंभः। तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः अवघातमंत्रा-
दयो विवक्षितं व्रीह्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरूपोपोद्घातः सवित्रग्निप्रसवशब्दानां विकृति-
ष्वनामस्वूहः अग्निशब्दस्यानूहः इत्यादिकऊहविचारारंभः द्वितीये सप्रविकारः सामोहः तृतीये मंत्रोहः चतुर्थे मंत्रोहप्र-
संगापतितो विचारः द्वारलोपस्य विस्तारः कार्यैकत्वं समुच्चयः। ऊहसामप्रकीर्णानि नवमेऽष्टपादगाः दशमाध्याय-
स्य प्रथमे पादे बाधहेतुर्द्वारलोपो निरूपितः तद्यथा स्वयंकृता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन

६

त्रिष्वादकानामुन्नयनादीनां बाधः । कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः । द्वितीये संक्षेपेणोक्तस्य द्वारलो-
पस्य बहुभिरुदाहरणैर्विस्तारः । तृतीये बाधकारणं कार्यैकत्वं तत्र यथा प्रकृतौ गवाश्वादिदक्षिणया ऋत्विक्परिक्रयः कार्यं
तथा विकृतिरूपे भ्रातृव्यैकाष्टकाधेनुरूपाया दक्षिणायास्तदेव कार्यमिति तेन धेन्वा गवाश्वादिदक्षिणा विकृतौ चोदकप्राप्ता बाध्यते । च-
तुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तैर्नारिष्ठहोमैः सह समुच्चीयन्ते इत्यादिः समुच्चयः । पंचमे षोडशिग्रहः प्रकृतिगामी स
चाग्रयणपात्रादेव ग्रहीतव्य इत्यादि बाधप्रसंगागतो ग्रहादिविचारः । षष्ठे सामनत्वे गेयमित्यादिर्बाधप्रसंगागतः साम-
विचारः । सप्तमे पशुगणेषु हविर्भेदो गृहमेधीयमवभृथं कर्मेत्यादि बाधप्रसंगागतः प्रकीर्णविचारः । अष्टमे नानूयाजेष्वि-
ति पर्युदासो न त्वसोमद्गत्यर्थकादेनातिरात्रे इति प्रतिषेध इत्यादिर्बाधोपयुक्तो नञर्थविचारः । इत्योद्भूतस्तथा तंत्रावापौ
तंत्रस्य विस्तृतिः ॥ आवापविस्तृतिश्चैकादशाध्यायस्य पादगाः ॥ एकादशाध्यायस्य प्रथमे पादे तंत्रस्योपोद्घातो वर्णि-
तः । द्वितीये तंत्रावापौ संक्षेपेणोक्तौ । तृतीये तंत्रमुदाहरणबाहुल्येन प्रपंचितं । चतुर्थे तथैवावापः प्रपंचितः । प्रसंगस्त-
त्रनिर्णीतिः समुच्चयविकल्पने । द्वादशाध्यायपादार्था इति पादार्थसंग्रहः ॥ द्वादशाध्यायस्य प्रथमे पादे पशुधर्माणां पशुपु-
रोडाशे प्रसंगः । सौमिकवेदेः कृतस्य कार्यलीनकर्मसु प्रसंग इत्यादिविचारः । द्वितीये सवनीयपशौ तंत्रित्वं न तु सवनीयपुरोडा-
शानां विकृतिस्तंत्रिणी न प्रकृतिरन्वारंभणीया विकृतिष्वपि स्यात् । न तु प्रकृतावेवेत्यादिविचारः । तृतीये वृज्ञासंसेः समु

च्चयः आधारगतानां गुणसंतानां चाहीनां समुच्चयद्वृत्यादिकं प्राधान्येन यवव्रीह्योर्विकल्पद्वृत्यादिकं समुच्चयापवादत्वेनेत्युभ
यं चिंतितं चतुर्थे चैंद्राबार्हस्पत्ययाज्यानुवाक्यायुगलयोर्विकल्पद्वृत्यादिकं प्राधान्येन याज्यानुवाक्ययोः समुच्चयद्वृत्या
दिकं विकल्पापवादत्वेनेत्युभयं चिंतितं । तदेवं द्वादशाध्यायेषु षष्टिसंख्याकेषु पादेषु प्रतिपाद्याः अर्थाः संगृहीताः ॥
नं ७ ननु यथोक्तक्रमः पादार्थैर्मान्यैरर्था बहवस्ते स्यादेषु विचार्यन्ते तेषां कथं तत्तत्पादांतर्भावः स्यादाशंक्याह उपोद्घातापवाद
प्रासंगानुप्रसंगतः । तत्तत्पादगतत्वेन विचारांतरमुन्नयेत् ॥ यथोक्तपादप्रतिपाद्यादन्येष्वर्थेषु यथोचितं कश्चिदु
पोद्घातः कश्चिदपवादः कश्चित्प्रसंगपतितः कश्चिदनुप्रसंगपतित इत्येवं पादांतर्भावो ज्ञेयः ननु संत्येवमध्याया
नां पादानां च व्यवस्थिता अर्थाः तदीयस्तु क्रमः कथमवगंतव्य इत्यत आह ॥ शास्त्रे पूर्वोत्तरीभावोऽध्यायानामभिधा
स्यते । पादानां तु क्रममत्रैव लेशतो व्युत्पादयामहे ॥ एकस्मिन्नध्याये समाप्ते सति अध्यायांतरारंभे तयोरध्याययोः पूर्वो
त्तरीभावो वक्ष्यते प्रथमाध्याये । तानां पादानां पूर्वोत्तरीभावे उदाहृते सति तत्पुस्तकपादांतरेष्वपि तस्योन्नेतुं
शक्यतया तमुदाहरति । विधिः साक्षाद्धर्मे तस्य शेषोऽर्थवादगीः । वेदमूला स्मृतिर्नामवाक्यांशो मीयते ततः
क्रमः । प्रतिज्ञातत्वेन प्रतिज्ञाते धर्मे विधिवाक्यं साक्षात्प्रमाणमिति तद्विचारः प्रथमे पादे पुत्रकः अर्थवादवाक्यस्य

विधिद्वारा प्रामाण्यसिद्ध्यनन्तरभावित्वं स्मृतिवाक्यस्य स्मार्थवादविधिरूपवेदमूलकतया प्रामाण्यादर्थवादतदनन्तरभावित्वं। नाम
धेयस्य वाक्यैकदेशत्वेन पूर्वोक्तत्रिविधवाक्यविचारोत्तरकालीनत्वं। अनेनन्यायेनोत्तराध्यायगतपादानां परस्परं क्रमऊ
नेयः। एवं शास्त्रस्याध्यायानां पादानां च क्रमविशेषविशिष्टानामसाधारणप्रतिपाद्यमर्थं निरूप्य तन्निरूपणफलं द
र्शयति। उक्ता संगतिः क्रमस्तथावान्तरसंगतिं। उद्देशाक्षेपदृष्टान्तप्रत्युदाहरणादिरूपां। शास्त्रस्यादिप्रतिपाद्यार्थसंबंधि
तयाधिकरणे योजिते सति तस्याधिकरणस्य शास्त्रसंगतिरध्यायसंगतिः पादसंगतिश्चेति तिस्र उक्ता भवन्ति तद्यथा प्र
थमाध्यायप्रथमपादस्य द्वितीयाधिकरणे धर्मस्य लक्षणप्रमाणराहित्यं पूर्वपक्षीकृत्य तत्र सद्भावः प्रतिपादितः तस्या
धिकरणस्य धर्मसंबंधितया धर्मविचारशास्त्रसंगतिः प्रमाणविचाररूपत्वात्प्रथमाध्यायसंगतिः विधिवाक्यस्य
प्रमाणत्वेनोपन्यासात्प्रथमपादसंगतिः यथैतत्संगतित्रयमुक्तं। तथा पूर्वोत्तराधिकरणयोः परस्परमवान्त
रसंगतिरूहनीया। सा चानेकरूपा। आक्षेपसंगतिर्दृष्टान्तसंगतिः प्रत्युदाहरणसंगतिः प्रासंगिकसंगतिरुपोद्घातसंग
तिरपवादसंगतिश्चेत्येवमादिरूपा। तासामाक्षेपादिसंगतीनामहं व्युत्पादयामि। पूर्वन्यायस्य सिद्धान्तयुक्तिं वीक्ष्य परे
न्याये पूर्वपक्षोक्तयुक्तिं चेत्तत्राक्षेपादि योजयेत्। तदेतत्सर्वं योजयित्वा प्रदर्श्यते। प्रथमेऽध्याये प्रथमपादस्य प्रथमा

रू२

धिकरणगतो धर्मविचारशास्त्रं वैधमिति सिद्धं ततः । अर्थज्ञानहेतावध्ययने नियमविधेः संभवादिति तद्युक्तिः । द्वितीयाधिक
रणे धर्मे लक्षणं प्रमाणं च नास्तीति पूर्वपक्षः । लौकिकाकारहीनत्वात्प्रत्यक्षाद्यप्रवृत्तेश्चेति तद्युक्तिः । तथा युक्त्या धर्मस्य ल
क्षणप्रमाणरहितत्वे सति नरविषाणसमो धर्म इति तद्विचारशास्त्रस्य विधेयत्वमनुपपन्नमित्याक्षेपसंगतिः । यथा प्रथ
माधिकरणे नियमविधिसंभवेन हेतुना विचारशास्त्रस्य विधेयत्वमुक्तं तथा द्वितीयाधिकरणे लौकिकाकाररहितत्वप्रत्यक्षाद्य
प्रवृत्तिरूपेण हेतुना धर्मे लक्षणप्रमाणे न स्त इति दृष्टान्तसंगतिः । यथा प्रथमाधिकरणसिद्धान्ते पूर्वोक्तयुक्तिरवलोक्यते त
था द्वितीयाधिकरणसिद्धान्ते कांचिदपि युक्तिं न पश्याम इति प्रत्युदाहरणसंगतिः । एते दृष्टान्तप्रत्युदाहरणसंगती मंदबुद्धि
भिरपि सर्वत्रोत्प्रेक्षितुं शक्यते । पंचमाधिकरणे विधिवाक्यस्य निरपेक्षत्वात्प्रामाण्यं वर्णितं तस्य च वाक्यस्य शब्दार्थ
योर्मध्ये शब्दकोटिनिविष्टत्वाद्वाक्यप्रसंगेन शब्दनित्यत्वं षष्ठाधिकरणे वर्ण्यत इति प्रासंगिकसंगतिः । प्रथमाध्या
यस्य चतुर्थपादे द्वितीयाधिकरणेन सौर्यादिविकृतिषु वैदिकमंगजातमुपदिष्टं तदुपयोगित्वेन प्रथमाधिकरणे धर्मसा
पेक्षत्वं साधितं तत्र प्रथमाधिकरणमुपोद्घातः । एवमुत्तराधिकरणेन सह पूर्वाधिकरणस्योपोद्घातसंगतिः । प्रथमाध्या
यस्य तृतीयपादस्य प्रथमाधिकरणेऽष्टकादिस्मृतेः प्रामाण्यमुक्तं द्वितीयाधिकरणे सर्वविरुद्धस्मृतेः पूर्वपक्षप्राप्तं प्रामाण्यमपो

पते। सेयमपवादसंगतिः। अनया दिशा सर्वत्र संगतिरूहनीया। इत्थं संगतीर्व्युत्पाद्याथ प्रस्तुताधिकरणविषयसंशयपूर्वपक्षसिद्धान्तां
श्च हेतुदोषापवादान् संजिघृक्षुः प्रथमाध्यायस्य प्रथमपादे प्रथमाधिकरणं भट्टमतेनारचयति॥ स्वाध्यायोऽध्येतव्य इत्यस्य विधान
स्य प्रयुक्तितः। विचारशास्त्रं नारभ्यमारभ्यं वेति संशयः। अर्थधीहेतुताधीते लौकिकसिद्धावघातवत्। नियामकं न चैवातो वैधा
रम्भो न संभवी। दर्शपूर्णवदस्य चैकत्वेऽपूर्वं नियामकं। अर्थनिर्णायकं शास्त्रमत आरभ्यतां विधेः। चोदनालक्षणोऽर्थो धर्म इ
त्यारभ्य अन्वाहार्ये च दर्शनादित्येतदन्तं जैमिनिप्रोक्तं सूत्रजातं धर्मविचारशास्त्रं तदेतस्य प्रथमाधिकरणस्य विषयः।
स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिरक्षरग्रहणमात्रपर्यवसायीति केचिन्मन्यन्ते। अपरे त्वेवमाहुः अर्थज्ञानरूपदृष्टप्र
योजनायेदमध्ययनं विधीयते। अर्थज्ञाने च विचारमन्तरेण न संभवतीत्यतो विधिर्विचारशास्त्रस्य प्रयोजक इति न चैवं सं
शयः। इदं विचारशास्त्रं किं विधिप्रयुक्त्या नारम्भणीयमुतारम्भणीयमिति। न चार्थज्ञानायाध्ययनस्य विधिरिति वदन्वा
दी प्रष्टव्यः। किमसति मप्राप्तमध्ययनं विधीयते किं वा पक्षे प्राप्तमवघातवन्नियम्यत इति। नाद्यः। नियमेन वेदाध्ययनं अर्थज्ञा
नहेतुः अध्ययनत्वात् भारताध्ययनवत् इत्यनुमानेन विधिनिरपेक्षेण प्राप्तत्वात्। न द्वितीयः पक्षः। अवघातवन्नि
यमविधित्वसंभवात्। यथा नखैरवघातेन वा तण्डुलनिष्पत्तिसंभवात् पक्षे प्राप्तोऽवघातो विधिना अवश्यं कर्तव्य इति नियम्यते।

अध्ययनेनजन्येन

१८

तथा लिखितपाठेन गुरुपूर्वकाध्ययनेन वार्थज्ञानसंभवात् पक्षे प्राप्तमध्ययनं विधिना नियम्यते इति चेत् । न । वैषम्यात् । अवघातनिष्पन्नैरेव
तण्डुलैरवान्तरापूर्वद्वारेण दर्शपूर्णमासौ परमापूर्वं जनयतः नान्यथा । ततो दर्शपूर्णमासापूर्वमवघातस्य नियमहेतुः । अत्र तु
लिखितपाठजन्येनार्थज्ञानेन क्रत्वनुष्ठानसिद्धेरध्ययनस्य नियमहेतुर्नास्ति । अतो द्विविधविध्यसंभवात् अर्थज्ञानहेतुविचारशा
स्त्रारंभस्य वैधत्वं नास्ति । तर्हि श्रूयमाणस्य विधेः का गतिरिति चेत् । स्वर्गो यागाक्षरग्रहणमात्रं विधेयमिति वदामः । अश्रुतोऽपि स्व
र्गो विश्वजिन्न्यायेन कल्पनीयः । स स्वर्गः स्यात् सर्वान्प्रत्यविशेषात् इति सूत्रेण विश्वजितस्य श्रूयमाणमप्यधिकारिणं संपादयितुं तद्विशे
षणं स्वर्गफलं कल्प्यमानस्यापि तं तद्वदध्ययनेऽप्यस्तु एतदेवाभिप्रेत्योक्तं ॥ विनापि विधिना दृष्टलाभान्नहि तदर्थता । कल्प्यस्तु विधिसा
मर्थ्यात्स्वर्गो विश्वजिदादिवदिति । एवं च सति वेदमधीत्य स्नायादिति शास्त्रमनुगृह्यते । अस्मिंश्च शास्त्रे वेदाध्ययनसमावर्त
योर्नैरन्तर्यं प्रतीयते । सति पक्षे त्वधीतेऽपि वेदे धर्मविचाराय गुरुकुल एवाधिवासः कर्तव्यः । तथा सति नैरन्तर्यं बाध्येत । तस्मा
द्विचारशास्त्रस्य वैधत्वाभावात् पाठमात्रेण स्वर्गसिद्धेः समावर्तनशास्त्राच्च धर्मविचारशास्त्रं नारंभणीयमिति पूर्वपक्षः ।
अत्रोच्यते । यदुक्तं लोकसिद्धत्वान्न प्राप्तविधिरिति तत्तथैवास्तु नियमविधित्वं तु न वारयितुं शक्यं । यथा दर्शपूर्णमा
सजन्यं परमापूर्वमवघातनियमजन्यस्यावान्तरापूर्वस्य कल्प्यत्वं एवमशेषक्रतुजन्यमपूर्वजातं क्रत्वनुष्ठानसाध्यनाध्य

८

पतानियमतोऽन्यस्यापूर्वस्य कल्प्यत्वं भविष्यतीति नियमादृष्टानंगीकारे वक्ष्यमाणो विधिरनर्थकः स्यात्। न चाविश्वजिन्न्यायेनास्य
स्वर्गार्थत्वं युक्तं दृष्टफले ऽर्थज्ञाने संभवत्यदृष्टस्य कल्पयितुमशक्यत्वात्। अत एवोक्तं। लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना
विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यतीति। नन्वेवमपि श्रुतव्याकरणाद्यंगस्याधीतवेदस्य पुरुषस्यार्थज्ञानसंभवाद्विचा
रशास्त्रस्य वैयर्थ्यमिति चेन्न ज्ञानमात्रसंभवेऽपि निर्णयस्य विचाराधीनत्वात्। अक्ताः शर्करा उपदधातीत्यत्र घृतेनैव न तै
लादिनेत्ययं निर्णयो व्याकरणेन निगमेन निरुक्तेन वा न सिध्यति। विचारशास्त्रं तु तेजो वै घृतमिति वाक्यशेषाद्घृतं निर्णे
ष्यति। अतो विचारो वैधः। वेदमधीत्य स्नायादिति शास्त्रं त्वध्ययनसमावर्तनयोः पूर्वापरीभावसमानकर्तृकत्वे एवा
चष्टे। न त्वानंतर्यं। तस्माद्बुद्धिवशाद्वेदविचारशास्त्रमारंभणीयमिति सिद्धं ततः। अस्मिन्नेवाधिकरणे गुरुमतमा
ह। अथवाध्यापनासिद्ध्यर्थे नाप्यध्ययने विधिः। तेन पूर्वोक्तदोषपक्षौ प्रसाध्यावन्यहेतुभिः। विधेयाध्यापनं सिद्ध्येद्द
लस्यार्थधियं विना। तेनात्र विषयं शास्त्रं निष्फलं चेत्युपेक्ष्यतां। स्वतः प्राप्तार्थबोधस्य विवक्षानपनोदनात्। विषयादि
सुसंपादं शास्त्रस्यारभ्यतां ततः। अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यध्यापनं विहितं न चात्र नियोज्याभावः आ
चार्यत्वकामिनो नियोज्यत्वात्। उपनयीतेत्यनेनाचार्यकरणे विहिते नात्मनेपदेन नियोज्यविशेषणमाचार्यत्वं प्रतीयते

उपनयने यो नियोज्यः स एवाध्यापनेपि तयोरेकप्रयोजनत्वात् । एवं च सति आचार्यकर्तृकमध्यापनं माणवककर्तृकेनाध्ययनेन
न विना न सिध्यतीति अध्यापनविधिप्रयुक्त्यैवाध्ययनानुष्ठानसिद्धेर्न पृथगध्ययने विधिरभ्युपगन्तव्यः । अतः स्वाध्यायविधिवाक्यं
नित्यानुवादत्वेनाप्युपपद्यते । ततोऽध्ययनविधिमुपजीव्य पूर्वमुपन्यस्तो दृष्टान्तस्तदपेक्षयान्यथा व[र्]णनीयौ विषयसंशय-
यौ स्तु नास्ति विप्रतिपत्तिः । विचारशास्त्रं विषयः अवैधं वैधं वेति संशयः । तत्र वैधत्ववादी प्रष्टव्यः किं येयमाचार्यकर्तृ-
कमध्यापनं किं माणवकस्यार्थज्ञानमपि प्रयुञ्जीत किं वा पाठमात्रं नाद्यः अन्तरेणाप्यर्थज्ञानमध्यापनसिद्धेः । पाठमात्रे
तु विचारस्य विषयो न संभवति आपाततः प्रतीतः संदिग्धो ह्यर्थो विषयः तथा सति यत्रार्थप्रतीतिरेव नास्ति तत्र संदेहस्य
का कथा निर्णयो विचारस्य फलं सोऽपि विषयवत् दूरापेतः अतो विषयप्रयोजनाभावाद्विचारशास्त्रमनारंभणीयमिति
पूर्वपक्षः । अत्रोच्यते । मा[भू]न्नामाध्यापनेनार्थावबोधः प्रयुज्यतां । तथापि सांगवेदाध्यायिनो निगमनिरुक्तव्याकरणव्यु-
त्पन्नस्य पौरुषेयग्रन्थेष्विव वेदेप्यर्थावबोधः स्वत एव प्राप्नोति । ननु यथा विषं भुङ्क्ष्वेत्यत्र प्रतीयमानोप्यर्थो न विवक्षितः ।
तथा वेदार्थस्याविवक्षायां विषयाद्यभावस्तदवस्थ इति चेत् न विवक्षाया अपनोदितुमशक्यत्वात् । विषभोजनवा-
क्यस्यात्र प्रमाणान्तरेण बाधो माभूदिति मुख्यार्थस्तत्र परित्यक्तः । वेदे तु कुतो न विवक्षितार्थत्वं विवक्षिते च वेदार्थे यत्र

पञ्चपुरुषस्य संदेहः समस्तवेदोऽपि विचारशास्त्रस्य विषयः तन्निर्णयः प्रयोजनं। ततोऽध्यापनविधिप्रयुक्तेनाध्ययनेनावबुध्यमानस्या
र्थस्य विचार्यत्वाद्विचारशास्त्रस्यैवैधत्वं सिद्धं ॥ १ ॥ द्वितीयं भरमतेनावचयति विचारविषयो धर्मो लक्षणेन विवर्जितः। मा
नेनबाधवोपेतत्वाद्व्याप्तिविधिर्विंस्यते। लौकिकाकाररहितस्य तस्य किं नाम लक्षणं। मानशंका तु दूरे तत्र प्रत्यक्षाद्यप्रवर्तना
त्। चोदनागम्य आकारो ह्यर्थत्वे सति लक्षणं। अत एव प्रमाणं च चोदनैवात्र नोक्तः। लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः
अत एवाह। मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात् इति सजातीयविजातीयव्यावर्तको लक्ष्यगतः कश्चिद्धर्मः क्वचित्प्र
सिद्ध आकारो लक्षणं तेन लक्षणेन लक्ष्ये वस्तुनि संभावनाबुद्धौ जातायां प्रमाणमनुयुक्तः प्रमाणेन तदवगच्छति त
यथा सास्नादिमती गौरित्युपश्रुत्य चतुष्पात्सु जीवेषु तल्लक्षणलक्षितपदार्थमभिवीक्ष्य अयं गौरिति चक्षुषावगच्छति।
एवं च सत्यलौकिकत्वाद्धर्मस्य नास्ति लक्षणं न च कुतः प्रमाणानुयोगः कथंचिद्योगेऽपि न तत्र प्रमाणसद्भावः शंकितुम
पि शक्यः न तावदत्र प्रत्यक्षं क्रमते धर्मस्य रूपादिरहितत्वात् अत एव व्याप्तिग्रहणाभावान्नास्त्यनुमानं प्रत्यक्षानुमा
नमूलश्च [illegible] शब्दस्य संगतिग्रहः ततोऽप्युत्प[illegible]प्रमाणाभावान्नागमोऽपि तत्र प्रवर्तते तस्माद्धर्मो लक्षणप्रमाणरहित इ
ति प्राप्ते क्रमः। मा भूदक्षुरादिगम्यो लौकिक आकारः। तथापि चोदनागम्यः स्वर्गादिसाधनत्वादिलक्षण आका

10

रोक्तितेनार्थत्वे सति चोदनागम्यो धर्म इति लक्षणं भवति अर्थो धर्म इत्युक्ते ब्रह्मणि चैत्यवंदनादौ घटादौ चातिव्याप्तिः त
था वधे श्येनचोदनागम्य इत्युक्ते तावत्स्येनोक्ते विधिगम्ये अनर्थफलत्वेनानर्थरूपे श्येनाद्यभिचारकर्मण्यतिव्याप्तिः त
था वधे तापार्थ इत्युक्ते यद्यपि श्येनस्य शत्रुवधः फलं न तु नरकः तथापि तस्य वधस्य नरकहेतुत्वात् दुःखहेतुतया श्येनोऽनर्थः
न चैवमग्नीषोमीयपशुहिंसाया अपि वधत्वेन नरकहेतुत्वं स्यादिति शंकनीयं। तस्याः क्रत्वंगत्वेन क्रतुफलस्वर्गव्यति
रेकेण फलांतराभावात्। एतच्चोदनागम्यत्वे सत्यर्थत्वं धर्मलक्षणं अतएव गम्ये धर्मे गमकं विधिवाक्यं प्रमाणं। य
द्यपि प्रत्यक्षानुमानयोरविषयो धर्मः तथापि प्रसिद्धपदसमभिव्याहारेण व्युत्पत्तिः संभवति तस्माल्लक्षणप्रमाणाभ्यामु
पेतो धर्मः। अस्मिन्नेवाधिकरणे गुरुमतमाह॥ यद्वा जिज्ञास्यवेदार्थः किं मंत्राद्यवबोधितः। सिद्धार्थोऽप्यथ विध्येकगम्यः
कार्यार्थ एव वा। सिद्धेऽपि पुत्रजन्मादौ व्युत्पत्तेरुपपत्तिभिः। मंत्रादिगम्यसिद्धस्य वेदार्थत्वेऽपि काक्षतिः। हर्षहेतुबहुत्वेन
व्युत्पत्तिः पुत्रजन्मनि। दुर्ज्ञेयामुखभाकार्यैवेदार्थोऽतः स एवाहि। अथातो धर्मजिज्ञासेत्यत्र धर्मशब्देन रूढत्ववेदाप्य
पनानंतर्यमुच्यते। अतः श्रोत्रेन कृत्स्नस्य वेदस्य विवक्षितार्थत्वं हेतुः क्रियते। उक्तश्रुत्युक्तयानुसारेण धर्मशब्दोऽपि रूढत्वा वे
दार्थमाचष्टे। ततः सर्ववेदार्थो जिज्ञास्य इति प्रतिज्ञाकृता। तत्र संशयः। किं मंत्रार्थवादप्रतीतः सिद्धार्थोऽपि वेदार्थो भव

ति किं वाविधिवाक्यप्रतीतः कार्यार्थ एव वेदार्थ इति । तत्र ज्ञोक्तार्थमतसामर्थ्यः शब्दो वेदेपि बोधक इति न्यायेन व्युत्पत्त्यनुसा
री वेदार्थो वर्णनीयः सुसंपत्ति । अग्निहोत्रार्थे पत्नि पुत्रस्ते जात इति वा तहि रव्याह । अन्यं ओ तुहर्षि मुनुमा पहर्ष हे तौ पुत्रजन्म
निर्जं गतिं प्रतिपद्यते तेनामेवार्थवादप्रतीतो यथार्थो वेदार्थ इति प्राप्ते भ्रमः । पुत्रजन्म वदूषहेतु नोधनलाभादीनां बहुत्वा
द्वाक्यस्य पुत्रजन्मैवार्थ इति निर्णयो दुर्लभः । गामानयेति वाक्ये तु गवानयनरूपां मध्यम व्युत्पत्तिमवलोक्य संगति
ग्रहणं सुलभं तस्मात् कार्यरूप एव वेदार्थ इति तृतीयं मतं मतेनोपन्यस्यति धर्मस्य ज्ञापकं मानं य दुक्तं चोदना लक्षणं । ए
तत्किं न परीक्ष्यं स्यात् किं वासम्यक् परीक्ष्यतां । मानोपदेशान्मे यस्य सिद्धत्वा किं परीक्षया । मेवं विचारशास्त्रे स्मिन्नुपरी
क्षोपेक्ष्यते कुतः । स्पष्टोर्थः । अस्मिन्नेवाधिकरणे गुरुमतमाह । आदौ परीक्ष्यो वेदार्थश्चोदनामानताथवा । वेदार्थस्य
प्रधानत्वात्प्रथमं तत्परीक्षणं । चोदनामानतैवात्र प्रथमं साध्यतां गता । अनपेक्षतया तस्य यतोमुख्यत्वमाश्रितं । द्वि
तीयाध्यायाद्यैः कर्मभेदशेषशेषित्वादिरूपो वेदार्थः स्वस्वकाण्डे परीक्षिष्यते । चोदनाप्रामाण्यस्य तु प्रथमेध्या
ये परीक्षा । तदेतद्युक्तं कुतः वेदार्थस्य प्रधानत्वे नादौ परीक्षणीयत्वात् । प्रधानभूतो हि वेदार्थः पुरुषार्थत्वेनानुष्ठेयत्वा
त् । प्रमाणं तु तद्बोधनाय प्रवृत्तं सत् तच्छेषतया न प्रधानमिति प्राप्ते भ्रमः । अत्रस्वतुष्टानोपाधौ वेदार्थप्रमाणयोः प्रथा

सद्दप्रामाण्यमतमेदर्शं न्यासः ४

णोपसर्जनभावः प्रमाणप्रमेयभावे तु प्रमाणस्यैव मुख्यत्वं निरपेक्षत्वात् । न हि स्वतः प्रामाण्यवादिनां मते सापेक्षता प्रमाण-
स्यास्ति । प्रमेयं तु सापेक्षं । मानाधीना मेयसिद्धिरित्युक्तत्वात् । तदेतन्मुख्यत्वमाश्रित्य सूत्रकारः प्रमाणपरीक्षामादौ
चकारेति युज्यते । अथान्यत्प्राधान्यमाश्रित्य धर्मविचारणमादौ कस्मान्न कृतमिति चेत् न कृतः अपरीक्षितेन प्रमाणेन ध-
र्मस्यासिद्धेः तद्विचारस्याप्यसिद्धेः । तदेवमधिकरणत्रये व्युत्पादनायतार्थप्रभाकरमतमुपन्यस्तं । अथ प्रायेण
भाट्टमतमेवोपन्यस्यते । चतुर्थ[illegible]मारचयति । प्रत्यक्षादिभिरप्येष गम्यते विधिनैव वा । अक्षादीनां प्रमाणत्वात् मेयध-
र्मावभासिता । वर्तमानैकविषयमक्षं धर्मस्तु भाव्यसौ । अक्षमूलोऽनुमानादिस्तेन विध्येकमेयता । अक्षं प्रत्यक्षं प्रत्यक्षादीनां प्रमा-
णत्वात् प्रमेयावभासकत्वं तावदविवादं । धर्मश्च प्रमेयः । असंदिग्धाविपर्यस्तत्वे सति बुध्यमानत्वात् घटादिवत् तस्मात् प्र-
त्यक्षादिभिरप्येष धर्मो गम्यत इति प्राप्ते ब्रूमः । धर्मस्य प्रमेयत्वेऽपि प्रत्यक्षयोग्यता नास्ति प्रत्यक्षस्य वर्तमानमात्रविष-
यत्वात् । यत्तु प्रत्यक्षस्यासत्त्वमविषयस्तत्रानुमानादीनां केव कथा क्वचित्प्रत्यक्षेण ग्रहणे व्याप्त्यादौ पश्चादनुमानादी-
नां प्रवृत्तिः । तस्माद्विधिनैव धर्मो गम्यते । पंचममारचयति । अबोधको बोधको वा न तावद्बोधको विधिः । शब्दे हि लौ-
किके धर्मे ग्रहणं दुर्घटं यतः । समभिव्याहृते धर्मे शक्तिग्रहणसंभवात् । बोधकस्य विधेर्मानत्वमनपेक्षतया स्थितं ।
यथा धर्मे प्रत्यक्षादीनां प्रामाण्यं नास्ति तथा विधेरपि नास्ति प्रामाण्यं । शक्तिग्रहणहेतुकं हि प्रामाण्यमाप्तवाक्यस्य

लोके दृष्टं ॥ शक्तिश्च लोकप्रसिद्धेर्गवादिशब्दवत् तेनैव धर्मस्यालौकिकत्वात् अतस्तत्र शक्तिग्रहणं दुर्घटं । तस्माद्विधेरबोधकत्वान्न धर्मे प्रामाण्य
मिति प्राप्ते ब्रूमः । यथा प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीत्यत्र मधुकरपदस्यार्थमजानन्नन्यपदार्थमवगम्य तत्स
मभिव्याहारात् कमलमध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य संगतिं गृहीत्वा वाक्यार्थं प्रतिपद्यते ।
तथा कारीर्यादिष्विह कामो यजेतेत्यत्र लोकप्रसिद्धस्वर्गशब्दस्यादिपदसमभिव्याहारादलौकिकभावनायां विधेः संगतिं गृहीत्वा विधि
वाक्यार्थं पुरुषो बुध्यते । तस्मादबोधकत्वलक्षणमप्रामाण्यं नास्ति । न च संवादाभावादप्रामाण्यं । समनन्तरभाविप्रतिनि
यतदृष्टफलेष्वेव कारीर्यादिषु संवादस्यापि संभवात् । अनियतदृष्टफले चित्रायागादौ प्रतिनियतजन्मान्तरफले ज्योतिष्टोमादौ
च संवादः कथमिति चेत् । एवं तर्हि स्वतःप्रामाण्योपगमान्नास्ति कापि संवादाद्यपेक्षा । तस्मादबोधकत्वसापेक्षत्वयो
रप्रामाण्यकारणयोरभावाद्विधेः स्वतःसिद्धं प्रामाण्यं नापहातुं शक्यं ॥ षष्ठाधिकरणमारचयति ॥ विध्यादिरूपो यः
शब्दः सोऽनित्यो धात्विनश्वरः । अनित्यो वर्णरूपत्वात् वर्णो जन्मोपलम्भनात् । अबाधितप्रत्यभिज्ञाबलाद्वर्णस्य नित्य
ता । उच्चारणप्रयत्नेन व्यज्यते सो न जन्यते । शब्दनित्यत्ववादिनो वैयाकरणास्तावदेवं मन्यन्ते । वर्णसमूहश्रवणान
न्तरमिदमेकं पदमिति प्रत्ययो मानसप्रत्यक्षेणोत्पद्यते । तस्य च प्रत्ययस्य वर्णव्यतिरिक्तः कश्चित् स्फोटो नामकः पदा
र्थो विषयः । स च नित्यः । सत्त्ववशात्तेन तु वर्णा इति तदेतन्नैयायिकादयो न सहन्ते । वर्णाश्चैवैकार्थावच्छेदोपाधिना पदं

कर्तृ दुरूपपनेर्वर्णानित्यत्वे कल्पकोटकल्पनानिरर्थिका । तस्मादुच्चारणनाशे नश्यद्भ्यो वर्णेभ्य अतिपुरुषं प्रत्युच्चारणं जन्मविनाशवंत उपलभ्यं
ते तस्मादनित्यः शब्दस्तस्य च कारणदोषसंभवाद्विधेरप्रामाण्यमिति पूर्वपक्षः ॥ बहुभिः पुरुषैः प्रत्येकं बहुकृत्व उच्चारिते गोश
ब्दे तदेवमेगकारादयो वर्णा इत्यबाधितप्रत्यभिज्ञा जायते तदुच्चा[illegible] नित्या वर्णाः । नचवर्णानां जन्माभावे बहुकृत्व उच्चारणप्र
यत्ना व्यर्थाइति शंकनीयं । तत्प्रयत्नस्य व्यंजकतांगीकारात् । एवं सति पुरुषभेदादुच्चारणभेदा यथायोगमुदात्तादिभेदैः पद्
मद्रुतादिभेदैश्चोपेतानां ध्वनि[illegible]विशेषाणां तुल्या वचारितार्था भविष्यंति । तस्मान्नित्ये शब्दे कारणदोषाभावान्नाम्नस्य प्रामा
ण्यं । सप्तमाधिकरणमारचयति ॥ वेदवाक्यमप्रमाणं स्यान्मानं वा नास्य मानता । पृथक्संवेदतोऽक्षाया मनपेक्षत्ववर्जनात् ।
वेदेपि लौकिकवन्नैव वाक्यार्थे संगतिः पृथक् । गृहीतव्याततो वाक्यं प्रमाणं नैरपेक्ष्यतः । यद्यपि वर्णानां नित्यत्वादेकार्यावच्छे
दकस्यापि पदस्य वर्णसमूहरूपतया नित्यत्वाद्वर्णपद्द्वारा वेदस्य कारणसापेक्षत्वं नास्ति तथाप्यग्निहोत्रं जुहुयात्स्वर्गकाम इत्या
दिवाक्यस्य वाक्यार्थे संगतिग्रहणमपेक्षितं ततो नैरपेक्ष्याभावात्प्रामाण्यं नास्तीति प्राप्ते ब्रूमः । लौकिकगामानयेत्यादिप
दप्रयोगेषु पदपदार्थयोरेव संगतिर्गृह्यते वाक्यं त्वाकांक्षायोग्यतासंनिधिवशात्स्वार्थं प्रतिपादयतीत्यविवादं । तथा वेदवा
क्यस्यापि प्रत्यायकत्वादनपेक्षत्वेन प्रामाण्यमविरुद्धं । अष्टमाधिकरणमारचयति ॥ पौ[illegible]रुषेयं न वा वेदवाक्यं स्यात्पौरु
षेयता । काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत् । समाख्याध्यापकत्वेन वाक्यत्वं तु पराहतं । तत्कर्त्रनुपलंभेनस्यात्त

तेषां पौरुषेयता। काठकं कौथुमं तैत्तिरीयमित्यादिसमाख्यातदर्शनात् तद्विषये लोके दृष्टान्तश्चित्तप्रत्ययश्च तेन प्रोक्तमित्यस्मिन्नर्थे वर्तते। तथा
सति व्यासेन प्रोक्तं वैयासिकं भारतमित्यादाविव पौरुषेयत्वं प्रतीयते। किंच विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात् कालिदासादिवा
क्यवत्। इति प्राप्ते ब्रूमः। अध्ययनसंप्रदायप्रवर्तकत्वेन समाख्योपपद्यते। कालिदासादिग्रन्थेषु तत्सर्गावसाने कर्तार उ
पलभ्यन्ते। तथा वेदस्यापि पौरुषेयत्वे तत्कर्तोपलभ्येत न चोपलभ्यते। अतो वाक्यत्वहेतुः प्रतिकूलतर्कपराहतः। तस्माद
पौरुषेयो वेदः। तथा सति पुरुषबुद्धिदोषकृतस्याप्रामाण्यस्याशंकनीयत्वात्। विधिवाक्यस्य धर्मे प्रामाण्यं सुस्थि
तं। इति माधवीये जैमिनीयन्यायमालाविस्तरे प्रथमस्याध्यायस्य प्रथमः पादः॥ द्वितीयपादस्य प्रथमाधिकरणमारच
यति॥ वायुर्वै क्षेपिष्ठेत्येवमादेरर्थवादस्य मानता। न विद्यतेऽस्ति धर्मे किं किंवा सोऽत्र विद्यते। विध्यर्थवादशब्दानां मिथोपेक्षाप
रिक्षयात्। नास्त्येकवाक्यता धर्मे प्रामाण्यं संभवेत्कुतः। विध्यर्थवादौ साकांक्षौ प्राशस्त्यपुरुषार्थयोः। तेनैकवाक्यता तस्मा
द्वारतो धर्ममानता। काम्यपशुकांडे विध्यर्थवादौ श्रूयेते। वायव्यं श्वेतमालभेत भूतिकाम इति विधिः। वायुर्वै क्षेपिष्ठा दे
वता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्यर्थवादः। तत्र विधिवाक्यगता वायव्यादिशब्दा अर्थ
वादशब्दनैरपेक्ष्येणैव विशिष्टमर्थं विदधति अर्थवादशब्दास्त्वितरनैरपेक्ष्येणैव भूतार्थमन्वाचक्षते। क्षिप्रगामी वा
युः स्वोचितेन भागधेयेन भागेन तोषितो भागप्रदायैश्वर्यं प्रयच्छतीत्युक्ते रामायणभारतादिवद्वृत्तान्तः कश्चित्प्रतीय

13

तेनस्यानुष्ठेयत्वं किंचित्। अत एकवाक्यताभावात् नास्ति अर्थवादस्य धर्मे प्रामाण्यमिति प्राप्ते ब्रूमः। आभ्यां दैकवाक्यता वाक्यैकवा-
क्यता तु विद्यते। विधिवाक्यं तावत् पुरुषं प्रेरयितुं विधेयार्थस्य प्राशस्त्यमपेक्षते। अर्थवादवाक्यं च फलवदर्थावबोधपर्य-
वसितमध्ययनविधिपरिगृहीतत्वेन पुरुषार्थमपेक्षते। ततः पुरुषार्थपर्यवसितविध्यपेक्षितप्राशस्त्यं लक्षणया वदन् स्वार्थस-
मर्पयदर्थवादवाक्यं विधिवाक्येन सहैकवाक्यतामापद्यते। यतः क्षिप्रगामित्वभावनया शीघ्रफलप्रदो वायुरस्य
पशोर्देवता ततः प्रशस्तमिदं वायव्यं पशुमालभेतेति वाक्ययोरन्वयः। तस्मादर्थवादः धर्मे प्रमाणं। अस्मिन्नेवाधिकरणे म-
तान्तरमनुसृत्य पूर्वोत्तरपक्षावाह। वादे कहेत्वपेक्षत्वान्न विधेर्मानतेति चेत्। सत्यं न्यायेऽस्तु तद्द्वारा नाप्येक्षेति गुरूक्तितः। यतो
वायुः क्षिप्रमेव फलप्रदः। अतो वायव्यमालभेतेत्येवमर्थवादे कहेतुमपेक्ष्य विधिः पुरुषान्नियुङ्क्ते ततः सापेक्षत्वादप्रा-
माण्यमिति पूर्वः पक्षः। विमतं कर्मानुष्ठेयं फलप्रददेवतोपेतत्वात्। राजसेवादिवादित्यनुमानं। यद्यर्थवादे विव-
क्ष्यते तदाशीमागमप्रमाणस्य विधिवाक्यस्य मानान्तरसापेक्षत्वं स्यात्। न त्वेवं विवक्षितं। किं तु फलप्रददेवतातोषकत्वोप-
न्यासमुखेन कर्मप्राशस्त्यमुपलक्ष्यते। तथा सति प्रशस्तकर्मानुष्ठेयमित्यस्मिन्नर्थे सार्थवादस्य विधेः पर्यवसानादेकवाक्य-
ताऽलभ्यते। तत् कुतः सापेक्षत्वं। तस्माद्विधिः प्रमाणमिति राद्धान्तः। द्वितीयमारचयति। उर्जोवरुध्या इत्येष विधिर्वा निगदो न
किं। यूपोदुम्बरतास्तौतिस्तोतित्वान्न विधिस्तथा। चतुर्थ्या फलतालाभाद्यूपोदुम्बरताफलं। उर्जो विधेयं कथयन्नूर्जकथंस्तु

यद्युक्कामानुष्ठेये सोमायौ लेपरूपि

तिपरो भवेत्। अनुष्ठितोदुम्बरत्वस्य विधानात्कस्य तत्फलं। अर्थाद्धि वाक्यभेदः स्तावक एव सः। इदमाम्नायते औदुम्बरो यूपो भवत्यू
र्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोऽवरुध्या इति। अत्र तच्छब्दाभिधेयो संततसारभूतः रसो ऊर्गुच्यते।
उदुम्बररूपयोर्जा यजमानार्थमध्वर्युः पशुरूपामूर्जमाप्नोति। ततो यूपस्यौदुम्बरत्वमूर्जः संपादनाय भवतीत्यर्थः। अत्रावरुध्या
इति तादर्थ्ये चतुर्थीति या फलत्वं गम्यते। धनलाभाय राजसेवेत्यादौ तदर्थदर्शनात्। न च फलपरस्य वचनस्य स्तावकत्वं युज्य
ते। अन्यथा स्वर्गकाम इत्यस्यापि ज्योतिष्टोमस्तावकत्वप्रसंगादिति प्राप्ते ब्रूमः। अयमूर्जोऽवरोधः कस्य फलं किमविहितस्यौ
दुम्बरत्वस्य उत विहितस्य। नाद्यः। अनुष्ठानमंतरेण द्रव्यमात्रात्फलानुत्पत्तेः। द्वितीये किमत्र विधिः प्रत्यक्षः उतोन्नेयः। ना
लि ७ द्यः। औदुम्बरो यूपो भवतीत्यत्र लिङ्प्रत्ययाश्रवणात्। द्वितीये तु सा समुन्नेयः न चात्र स्तुतिमंगीकरोषि। अथोच्येत विध्या
नायौदुम्बरत्वं स्तूयते तत्फलं चावबोध्यत इति। तर्हि वाक्यं भिद्येत। ततः फलविधिर्विकल्प्यमानमध्ये तद्वाक्यं स्तावकमेव।
अथैवमुरूमतेन पूर्वोक्तपक्षो बाह्य। आप्नोतीति विधित्वस्य वादत्वस्याप्यनिर्णयात्। न प्रमा चोदने सेतन्नेवादो हेतुकवाक्य
तः। ऊर्जं पशूनाप्नोतीत्येतस्य पूर्वार्थत्वाद्बुद्धिस्थं प्रतिभासते। लिङाद्यभावादर्थवादत्वं तु अतः संदिग्धत्वान्नप्रामाण्यं चोदना
या इति पूर्वः पक्षः। एकवाक्यत्वलाभे नार्थवादत्वं निर्णीयते। अतः प्रमाणं चोदनेति सिद्धान्तः। तृतीयमारचयति। ते नव्य
भमिति यो कोवादो हेतुरूपस्तुतिः। हिनाश्रुनाहेतुनातः १ रूपधिन्यत्र साधनं। भूर्य साधनताश्रौतीनाश्रौतैः सा विकल्प्य

ते। अतो निरर्थको हेतुः स्तुतिस्तस्मात्प्रवर्तिका। यदमाम्नायते अर्थेन जुहोति तेन सर्वं क्रियत इति। अयमर्थवादो विधेये अर्थे हेतुत्वेना
न्वेति। हि शब्दस्य हेतुवाचित्वात्। यस्मादन्नसाधनं तस्मादर्थेन होतव्यमित्युक्ते यद्यदन्नसाधनं दर्वीपिठरादि तेन तेन सर्वे
ण होतव्यमिति लक्ष्यते। ततः पिठरादयः तत्र अर्थेन सह विकल्प्यते इति प्राप्ते ब्रूमः। अर्थस्य होमसाधनत्वं श्रौतं तदीयया
तद्वत्तमात्रं पिठरादीनां तानुमानिकं। अतो समानबलत्वाभावे विकल्पो युक्तः। तस्मात् हेत्वर्थः स्तुतिस्तु प्ररोचनायोपयुज्यते
तस्मात्स्तुतित्वेनान्वयः॥ २॥ चतुर्थमारचयति॥ मंत्रा उरु प्रथस्वेति किमदृष्टे कहे तवः। यागेषु तत्पुरोडाशप्रथनादेः प्रभा
सकाः। आहोस्विन्नापि तज्ज्ञानं मंत्राः पूर्वे कहे तवः। न तज्ज्ञानस्य दृष्टत्वाद् दृष्टं वरं मे दृष्टतः। उरु प्रथस्वेत्ययं कश्चिन्मंत्रः त
स्यायमर्थः भोः पुरोडाश त्वं उरु विपुलं तां यथा भवति तथा प्रसरेति। एवमादयो मंत्रा यागप्रयोगे उच्चार्यमाणा अदृष्टमे
व जनयंति। न त्वर्थप्रकाशनाय तदुच्चारणं। पुरोडाशप्रथनलक्षणस्यार्थस्य ब्राह्मणवाक्येनापि प्राप्तत्वात् उरु प्रथस्वेति
पुरोडाशं प्रथयतीति हि ब्राह्मणवाक्यं। नैतत्युक्तं अर्थप्रकाशनस्य दृष्टप्रयोजनस्य संभवे सति विकल्पो दृष्टस्य कल्पयितु
मशक्यत्वात्। तस्मात् दृश्यमानार्थानुस्मरणमेव यागप्रयोगे मंत्रोच्चारणस्य प्रयोजनं ब्राह्मणवाक्येनार्थानुस्मरण
संभवेपि मंत्रेणैवानुस्मरणीयमिति यो नियमः तस्य दृष्टासंभवाददृष्टं प्रयोजनमस्तु। अत्रैवमतांतरेण रवैतरपक्षावाह। मं
त्रब्राह्मणयोर्यद्यप्यकल्पहोविनियोजने। नमंत्रलिंगसिद्धार्थमनुवक्ती तरत्र्यतः। अस्य मंत्रस्य लिंगेन विनियोगो मंत्रलिंगेन विव

[illegible] प्रयोजन विनियोगे ९

स्यैतेद्वयस्तु मयोर्विरोधादप्रामाण्यं चोदनाया इति पूर्वः पक्षः। नात्र विरोधः प्रबलेन लिंगेन विनियोगसिद्धौ वाक्यस्यानुवादकत्वादिति राद्धान्तः।
इति माधवीये न्यायमालाविस्तरे प्रथमाध्यायस्य द्वितीयः पादः॥२॥ तृतीयपादे प्रथममारचयति॥ अष्टकादिस्मृतेर्धर्मे न मानत्वं
मानताथवा। निर्मूलत्वान्न मानं सा वेदार्थोक्तौ निरर्थता। वैदिकैः स्मर्यमाणत्वात्संभाव्या वेदमूलता। विप्रकीर्णार्थसंक्षेपात्सार्थ-
त्वादस्ति मानता। २॥ अष्टकाः कर्तव्या इत्यादिस्मृतिवाक्यं न धर्मे प्रमाणं पौरुषेयवाक्यत्वे सति मूलप्रमाणरहितत्वात् विप्रलंभ-
कवाक्यवत्। अथ मूलप्रमाणकल्पनाय वेदार्थ एव स्मृतिभिरुच्यत इति मन्येथाः तर्हि वेदेनैव तदर्थस्याधिगतत्वादियं स्मृ-
तिरनर्थिका स्यात्। तदानीमनुवादकत्वादप्रामाण्यमिति प्राप्ते ब्रूमः। विमता स्मृतिर्वेदमूला वैदिकमन्वादिप्रणीतस्मृतित्वा-
त्। उपनयनाध्ययनादिस्मृतिवत्। न चैवं व्यर्थं अस्मदादीनां प्रत्यक्षेषु परोक्षेषु नानावेदेषु विप्रकीर्णस्यानुष्ठेयार्थस्यै-
कत्र संक्षिप्यमाणत्वात्। तस्मादियं स्मृतिर्धर्मे प्रमाणं। अस्मिन्नेव मतान्तरेण पूर्वोत्तरपक्षावाह। न मा स्मार्तमष्टकां-
गत्वाद्यां मनाद्भुतिमंगिनीः। तत्र स्मृतेर्वेदमूलेनुमिते मानत्वसंभवात्। यां तु नाप्नुतिनंदंतीत्यपि संप्रोक्ता आद्यस्यांगं तथा आद्धं स्मार्तं।
न हि तस्य प्रतिपादकं वेदवाक्यमुपलभामहे। तस्मादिदं मंत्रवाक्यं न धर्मे प्रमाणमिति चेत्तन्न तन्मूलस्य वेदस्यानुमेयत्वात्।
अनुमानं च दर्शितं। तस्मादष्टौ धर्मे मंत्रौ प्रमाणं। द्वितीयमारचयति। औदुंबरीवेष्टनीया सर्वेत्येषा स्मृतिर्मितिः। अमितिर्वे-
ति संदेहे मितिः स्यादष्टकादिवत्। औदुंबरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षवेदतः। विरोधान्मूलवेदस्यानुमानान्नमानता। ज्योतिष्टो-

15

मेसदो नामक स्यमंडपस्य मध्ये कांचिदौदुंबरीमारवा निखन्यते। तस्याश्च वाससा वेष्टनं स्मर्यते। औदुंबरी सर्वा वेष्टयितव्येति। सा पूर्वन्यायेन प्र
माणमिति प्राप्ते भ्रमः। औदुंबरीं स्पृष्ट्वोद्गायेदित्यनेन प्रत्यक्षवेदेनैव स्पर्शो विधीयते। न च सर्ववेष्टने स्पर्शः संभवति। अतो
मूलवेदानुमानं कालात्ययापदिष्टं। तस्माद्विप्रलंभकवाक्यवन्निर्मूलास्मृतिरप्रमाणं। अत्रैव मतांतरमाह। प्रत्यक्षानुमितश्रुत्यो
र्यद्व्याघातदर्शनात्। अप्रमाणत्वं संदिग्धे बाधोऽनुमानस्यात्र वर्णितः। परप्रत्यक्षवेदो न मूलं चेद्दूषणस्य तत्। अत्रैवमप्यनुष्ठा
नं स्वप्रत्यक्षानुरोधतः। स्पर्शसर्ववेष्टनविषययोः प्रत्यक्षानुमितयोः श्रुत्योः परस्परविरोधाद्दुर्बलयोरप्रामाण्यमिति पू
र्वपक्षः। अनुमानस्य कालात्ययापदिष्टत्वेन विरुद्धश्रुत्यभावेन स्पर्शश्रुतिः स्वार्थे प्रमाणं। अथ पुरुषांतरप्रत्यक्षवेदः सर्ववेष्टन
स्य तेषां मूलमित्युच्यते तर्हि मा भूत्तस्या अप्रामाण्यं। तथापि परप्रत्यक्षात्स्वप्रत्यक्षस्याभ्यर्हितत्वेन स्पर्शस्त्वेवानुष्ठेयो न सर्व
वेष्टनं। तृतीयमारचयति॥ वैसर्जनहोमीयं वासोग्रहणस्मृतिः। प्रमाणं वा श्रुत्यबाधात्प्रमा स्यादष्टकादिवत्। दृ
ष्टलोभैकमूलत्वसंभवे श्रुत्यकल्पनात्। सर्ववेष्टनवल्लुब्धहीनापेक्षा न हि प्रमा। ज्योतिष्टोमेऽग्नीषोमीयस्य पशोस्तंत्रे प्रक्रां
ते वैसर्जनहोमो विहितः। तत्र यजमानं पत्नीपुत्रांश्च भ्रातॄंश्चाहतेन वाससा संछाद्य वाससोंते स्रुगंडमुपनिबध्य जुहोति तस्मि
न्वासस्येवं स्मर्यते। वैसर्जनीयहोमीयं वासोऽध्वर्युर्गृह्णातीति स्मृतिः। सर्ववेष्टनस्मृतिवल्लुब्धस्य प्रत्यक्षश्रुत्या न बाध्यते नतोऽष्टका
दिस्मृतिवत्प्रमाणमिति प्राप्ते भ्रमः। कदाचित्कश्चिदध्वर्युर्लोभादेतद्गृह्णीयात् तन्मूलैवेयं स्मृतिरिति विकल्पनासंभव

नीति। दृष्टानुसारिणी चैवं कल्पनादक्षिणत्वापरिक्रीतानामृत्विजां लोमदर्शनात्। तथा सत्यस्याः स्मृतेरन्यथाप्युपपत्तौ अष्टकादिव
न्मूलश्रुतिः कल्पयितुं शक्यते। अतो बाधाभावे पि मूलवेदाभावान्न प्रमाणं। चतुर्थ आचमनमारचयति। आचांतेनेत्यमाभावा
स्मृतिरेवानमामवेत्। वेदं कृत्वेति यः श्रौतः क्रमस्तेन विरोधतः। आचांत्यादिः पदार्थोत्र क्रमो धर्मः पदार्थगः। धर्मस्य धर्म्यपेक्ष
त्वाद्बाधादस्ति मानता। क्षुते आचामेदिति विहितं पुरुषार्थमाचमनं। यदा तु क्रतुमध्ये क्षुतादिनिमित्तं प्राप्नोति तदा नैमित्तिक
माचमनं क्रत्वंगत्वेन स्मृत्या विधीयते। आचांतेनेत्यमिति सेयं स्मृतिर्न प्रमाणं। कुतः। विरुद्धत्वात्। इदं कृत्वा वेदिं करोतीति श्रुतौ
रर्थकालवाचिना क्त्वाप्रत्ययेन क्रमः प्रतीयते। वेदो नाम दर्भमयं संमार्जनसाधनं। वेदिराहवनीयगार्हपत्यमध्यवर्त्तिनी चतुरंगुलखा
ताभूमिः। तयोर्मध्ये यदा क्षुतादिनिमित्तमाचमनं कुर्यात्तदा श्रुत्युक्तं नैरंतर्यं विरुध्येत। तस्मात्पुनः स्मृतिविहिताचमनस्मृतिर्न प्रमाण
मिति प्राप्ते ब्रूमः। वेदवेद्यादिश्रुत्युक्तपदार्थवदाचमनादयः स्मृत्युक्ता अनुष्ठेयपदार्थाः। क्रमस्तु पदार्थनिष्ठो धर्मः। स च पदार्थानु
पजीवितत्वादुपजीव्यविरोधात्क्रम एव बाध्यते। न तु क्रमेणाचमनस्य बाधोस्ति। तस्मादियं स्मृतिः प्रमाणं। अस्मिन्नेव वार्तिकका
रः प्रकारांतरेणाधिकारपूर्वं चकार। तत्र प्रथमं विचारं दर्शयति॥ शाक्यादीनां हिंसनं धर्मो न वा धर्मः श्रुतत्वतः। न धर्मो नहि रक्तस्या
ज्ञो क्षीरस्य दृतौ धृतं। अहिंसा चर्यमाहं चोर्मां परिमिरहं चमसस्थैर्यत्वेन रक्षेदिति श्रुतावहिंसादिर्धर्मत्वेनोक्तः। स तत्र धर्मः। शाक्येनाप्युक्तः
तस्माच्छाक्यस्मृतिर्धर्मे प्रमाणमिति चेन्न। स्वरूपेण धर्मस्यापि गोक्षीरन्यायेन शाक्यग्रन्थसंबंधे सति अधर्मत्वप्रसंगात्। तदी

१७

16

पत्नं थेना हिंसादिर्न वर्जनीयः तस्मान्न सा धर्मे प्रमाणं । विचारान्तरं दर्शयति । सदाचारेऽप्रामाण्यान्निर्मूलत्वाद् मानता । अष्टकादेर्हि वै तस्य समू-
लत्वात्प्रमाणता । होलाकोत्सवादिसदाचारस्य मूलभूतवेदाभावादप्रामाण्यमिति चेत् । नैवं दिव्यैः शिष्टैः परिगृहीतत्वेनाष्टकादिवन्मू-
लमूलत्वात् । अत एव मन्वादिभिर्ग्रन्थगौरवभयाद्विशेषाकारेणानुपदिष्टोऽपि सदाचारः सामान्याकारेणोपदिष्टः । श्रुतिः स्मृ-
तिः सदाचार इत्येवं धर्मे प्रमाणोपन्यासात् । तस्माच्छिष्टाचारः प्रमाणं । पंचमाधिकरणमारचयति ॥ यवादिशब्दाः किं ह्यर्था नो वार्यम्लेच्छ-
साम्यतः । यदीर्घशूकप्रियंग्वाद्या द्वयेऽप्यर्था विकल्पिताः । १ । यत्रान्या इति शास्त्रस्थप्रसिद्धिस्तु बलीयसी । शास्त्रीये धर्मे तेनात्र
प्रियंग्वादिर्न गृह्यते । यवमयश्चरुर्भवतीति वाराही उपानहावुपमुच्यते इति श्रूयते तत्र यवशब्दमार्या दीर्घशूकेषु प्रयुंजते वराहश-
ब्दं च सूकरे म्लेच्छास्तु यवशब्दं प्रियंगुषु वराहशब्दं कृष्णशकुनौ तथा सति लोकव्यवहारेण निश्चेतव्येषु शब्दार्थेषु आर्यम्ले-
च्छप्रसिद्ध्योः समानबलत्वात् उभयविधा अप्यर्था विकल्पेन स्वीकार्या इति प्राप्ते ब्रूमः । शास्त्रीयधर्मावबोधे शास्त्रस्थ
प्रसिद्धिर्बलीयसी प्रत्यासन्नत्वाद् विच्छिन्नपारंपर्यागतत्वाच्च । शास्त्रे च यवविध्यर्थवाद एवं श्रूयते । यत्रान्या ओषधयो
म्लायन्तेऽथैते मोदमाना इवोत्तिष्ठन्तीति । इतरौषधिविनाशकाले निर्वृत्तिर्दीर्घशूकेषु दृश्यते न तु प्रियंगुषु तेषामितरौष-
धिपाकात्सर्वं पच्यमानत्वात् । उपानहि चार्थवादश्चैवं भवति वराहं गावोऽनुधावन्तीति गवामनुधावनं सूकरे संभवति । न तु
कृष्णशकुनौ तस्माद्दीर्घशूकादिर्यवशब्दार्थः । अत्र वार्त्तिककारः । पीलुशब्दमुदाजहार । तं च म्लेच्छा हस्तिनि प्रयुंजते आ-

र्यात्तु वत्सेतत्राविप्लुतव्यवहारस्यार्येषु संभवाद्धूलस्य एव पीलुशब्दार्थः। अस्मिन्नेवाधिकरणे गुरुमतमाह॥ यवाद्यर्थनिर्णये येन तद्वा
क्यं न प्रमेति चेत् न शास्त्रस्य बलिष्ठत्वेन तस्मिन्नर्थनिर्णयात्। स्पष्टोऽर्थः। अस्मिन्नेवाधिकरणे वार्त्तिककारमतेनैव वर्णकां
तरमारचयति॥ यो मातुलकन्याविवाहादौ शिष्टाचारः स मानं वा। इतराचारवन्मानत्वं मा वा स्मार्तबाधनात्। स्मृतिमू
लो हि सर्वत्र शिष्टाचारस्ततोऽत्र च। अनुमेया स्मृतिः स्मृत्या बाध्या प्रत्यक्षया तु सा। केषुचिद्दक्षिणदेशेषु मातुल
स्य दुहितरं शिष्टाः परिणयन्ति। सोऽयमाचारः प्रमाणं शिष्टाचारत्वात् होलाकाद्याचारवदिति चेत् न। स्मृति
विरुद्धत्वेन कालात्ययापदिष्टत्वात्। तथा च स्मृतिः। मातुलस्य सुतामूढ्वा मातृ गोत्रां तथैव च। समानप्रव
रां चैव त्यक्त्वा चान्द्रायणं चरेत् इति। न च स्मृत्याचारयोर्मूलवेदानुमापकत्वसाम्यात्समबलत्वमिति वा
च्यं। होलाकादिसदाचारस्य मन्वादिस्मृतिवद्वेदानुमापकत्वायोगात्। नहीदानींतनाः शिष्टा मन्वादिवत्
देशकालविप्रकृष्टं वेदादि व्यवहानेन साक्षात्कर्तुं शक्नुवन्ति येन शिष्टाचारो मूलवेदमनुमापयेत्। शक्नो
ति तु यः कोऽपि शिष्टो यत्र क्वापि देशविशेषे कालविशेषे च यं कंचिदपि होलाकाद्याचारस्य मूलं मन्तं स्मृ
तिग्रन्थमवलोकयितुं तस्मात् शिष्टाचारेण स्मृतिरेवानुमातुं शक्यते। न तु श्रुतिः। अनुमिता च स्मृतिर्विरु
द्धया प्रत्यक्षया स्मृत्या बाध्यते। अत एवाहुः। आचारात्तु स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनं। तेन न द्वे न द्वित्वे तेषां प्रामा

एवं विप्रकृष्यते। तस्मादप्रामाण्यमीदृशस्यार्थवादस्याभ्युपेयं। तत्रैवापरं वर्णकमारचयति। लौकिको वाक्यभेदो वार्थस्त्रिवृदादेः समत्वतः।
उभौ विध्यर्थवादावेकवाक्यत्वात् स्तुतिहेतिमः। त्रिवृद्बहिःपवमानमिति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लौकिकसिद्धोऽर्थः। वाक्यशेषो यो दृश्यत्यास्मे
केषु त्रिषु सूक्तेषु व्यवस्थितानां बहिष्पवमानात्मकस्तोत्रनिष्पादकत्वेनक्षमाणा उपास्मै गायता नर इत्यादीनामृचां नवकमर्थः। तत्र धर्म
निर्णये वेदस्य प्रबलत्वेऽपि पदपदार्थनिर्णये लोकवेदयोः समानबलत्वादुभावर्थौ विकल्प्येन गृह्येते तथा विति चेत् मैवं। लौकिकार्थस्वी
कारपक्षे विधिवाक्येऽर्थः त्रैगुण्यमर्थवादवाक्ये स्तोत्रीयाणां नवकमित्येवं विध्यर्थवादयोर्वैयधिकरण्यादेकवाक्यत्वं न
स्यात्। अत एकवाक्यत्वाय स्तोत्रीयाणां नवकमेव विधिवाक्येऽपि प्रतीतोऽर्थः। पञ्चाधिकरणमारचयति॥ कल्प्यः पिकादिशब्दा
र्थो न्याय्यो वा म्लेच्छरूढितः। कल्प्यो ह्यार्यप्रसिद्धत्वादनार्याणामनादरात्। न्याय्यो म्लेच्छप्रसिद्धिस्तु विरोधादर्शनेऽस
ति। पिकनेमादिशब्दानां कोकिलाद्यर्थता न ततः। आर्याः पिकादिशब्दं न क्वाप्यर्थे प्रयुञ्जते। म्लेच्छाश्च न प्रमाणभूताः तस्मा
न्निगमनिरुक्तव्याकरणैः पिकनेमादिशब्दानामर्थः कल्पनीय इति चेत् मैवं। आर्यप्रसिद्धिविरोधस्यादृष्टत्वेन ईदृशे वि
षये म्लेच्छप्रसिद्धेरप्यादरणीयत्वात्। कल्प्यमानादव्यवस्थितादर्थाद्वरं म्लेच्छरूढिः। यत्र दृश्या अपि रूढेरभावस्तत्रानि
रुक्तादय आदृतार्थाः। तस्मादनार्यप्रसिद्ध्यापि पिकः कोकिलः। नेमशब्दोऽर्धवाची तामरसशब्दः पद्मवाची इत्येवं द्रष्टव्यं।
अस्मिन्नेवाधिकरणे गुरुमतमाह। अर्थावबोधाद् प्रमाणं पिकाद्यभनचोदना। मैवं म्लेच्छप्रसिद्ध्यापि तद्बोधाद्विरुद्धता।

स्पष्टोऽर्थः। सप्तमाधिकरणमारचयति। अपौरुषेयाः कल्पाद्याः कृत्रिमा वा न कृत्रिमाः। श्रुतिस्मृत्योर्धर्मबुद्धेः स्वतोमानत्वं यतः समं।
पुनामोक्तेः पौरुषेयाः काठकाद्यसमत्वतः। यत्रोपलक्षेभिर्वेदे चित्रापस्तम्बादिकर्तृता। बौधायनापस्तम्बाश्वलायनकात्यायनादि
नामाङ्किताः कल्पसूत्रादिग्रन्था निगमनिरुक्तषडङ्गग्रन्था मन्वादिस्मृतयश्चापौरुषेयाः धर्मबुद्धिजनकत्वाद्वेदवत्। न च मूले
प्रमाणसापेक्षत्वेन वेदवैषम्यमिति शङ्कनीयं। उत्पन्नाया बुद्धेः स्वतः प्रामाण्याङ्गीकारेण निरपेक्षत्वात्। मैवं। उक्तानुमाने
स्य कालात्ययापदिष्टत्वात्। बौधायनसूत्रमाश्वलायनसूत्रमित्येवं पुरुषनाम्ना ख्यातेर्ग्रन्था उपेते। न च काठकादिसमाख्या
वत्प्रवचननिमित्तेत्यपि तत्कृतग्रन्थनिर्माणकाले तदानीन्तनैः केश्चिदुपलब्धत्वात्। तच्चाविच्छिन्नपारम्पर्येणानुवर्त
ते। ततः कालिदासादिग्रन्थवत्पौरुषेयाः। तथापि वेदमूलत्वात्प्रमाणं। अत्रैव गुरुमतमाह। कल्प्यं सर्वतिथौ दर्शकार्य
हो तोक्तेः श्रुतिर्न मा। न कल्प्ये साध्यवेदत्वप्रमाणं दुर्बलत्वतः। सर्वतिथौ दर्शयागकर्तव्यतां कल्पसूत्रकार आह। सर्वासु
तिथिष्वमावास्यायां कर्तव्येति श्रुतिस्त्वमावास्यायामेवेति द्योतयन्ती कर्तव्यतां ब्रूते। ततः कल्पसूत्रकल्पितेन वेदेन विरुद्धत्वा
दियं श्रुतिर्न मानमिति चेत्। मैवं। कल्पस्य वेदमूलत्वं नाद्यापि सिद्धं। किन्तु प्रयत्नेन साधनीयं। न च तत्साधयितुं शक्यं पौरु
षेयत्वस्य समाख्यया तत्कर्तृरूपलम्भेन च साधितत्वात्। अतः कल्पसूत्रस्य दुर्बलतया न श्रुतेरप्रामाण्यं। अष्टमाधि
करणमारचयति। होलाकादेर्व्यवस्थायास्याद्वा धारणत्वमुत्तानिमः। देशभेदेन दृष्टत्वात्साम्यं मूलसमत्वतः। होला

कादिशिष्टाचाराणां होलाकादीनां दिस्मृतिविशेषाणां चानुष्ठातृपुरुषभेदेन व्यवस्थितं प्रामाण्यं कुतः देशविशेषे तेषां दृष्टत्वात् हो
लाकादयः प्राच्यैरेव क्रियन्ते तेष्वसतोपि साहोलाका । आह्नीनैबुकादयो दाक्षिणात्यैः स्वस्वकुलागतं करंजाकादि स्थावरे
देवतापूजादिकमाह्नीनैबुकशब्देनोच्यते उद्वृषभयज्ञादयश्चोदीच्यैः ज्येष्ठमासस्य पौर्णमास्यां बलीवर्दानश्च योधयन्
18 ति सोयमुद्वृषभयज्ञः एवं होलाकादिस्मृतिः काचित्क्वचिद्देशविशेषे दृश्यते तस्मात् व्यवस्थितप्रामाण्यमिति चेत्
मैवं तन्मूलत्वेनानुमितस्य वेदस्य सर्वसाधारणत्वेन तेषामपि सर्वधोसारत्वात् अत्रैव गुरुमतमाह प्राच्या
दिपदयुक्ताया श्रुतेरनुमितौ पदे अर्थाबोधात् मात्वे चेन्न सामान्यानुमानतः प्राच्यादिभिर्व्यवस्थया होला
कादिष्वनुष्ठीयमानेषु तन्मूलश्रुतिरपि प्राच्यादिपदयुक्तैवानुमातव्या । तत्र प्राच्यादिपदस्यार्थो न बुध्यते ।
ये पुरुषाः कस्मिंश्चित्काले प्राच्यां निवसन्ति त एव कालान्तरे प्रतीच्यां दिशि निवसन्तः उपलभ्यन्ते तत्र श्रौतप्राच्यादिपदस्यार्था
बोधात् प्रमाणं श्रुतिरिति चेन्मैवं । अनुष्ठानसामान्यस्य मूलश्रुतिकल्पकत्वात् । अतः प्राच्यादिपदरहिते सत्यर्थबोधात्
नुमिता श्रुतिः प्रमाणं नवमाधिकरणमारचयति गोगाव्यादिषु साधुत्वे प्रयोगे वा न कश्चन । नियमोऽस्ति वा नास्ति
व्याकृतेर्मूलत्वदर्शनात् । साधुनैव प्रयुञ्जीत गावाद्या एव साधवः । कॢप्तस्तिनियमः सर्वपूर्वव्याकृतिमूलतः । व्याकरणाभि
ज्ञैः सास्नादिमद्वस्तुनि गोशब्दोऽयमेव प्रयुज्यते । तदनभिज्ञैस्तु स्वस्वदेशाऽपभाषामनुसृत्य गावीगोणीगोपोतलिकेत्येव

मादयः शब्दाः प्रयुज्यंते। तत्रैते एव शब्दाः साधव इति अस्मिन्नर्थे नियामकं नास्ति। तथा प्रयोगे पि तन्नास्ति ईदृशा एव
शब्दाः प्रयोक्तव्या नेदृशा इति न तावद्दृष्टव्यवहारो नियामकः। तस्य सर्वेष्वपि शब्देषु समानत्वात्। नापि व्याकरणस्मृतिर्नि
यामिका। तस्या निर्मूलत्वेनाप्रमाणत्वात्। नहि अभियुक्तप्रयोगस्तन्मूलं अन्योन्याश्रयत्वप्रसंगात्। व्याकरणस्मृतेः प्रा
माण्यसिद्धौ तदनुसारेण प्रयोक्तॄणामभियुक्तत्वसि[illegible]द्धिः। तत्सिद्धौ तत्प्रयोगमूलतया व्याकरणस्य प्रामाण्यं तस्मा
न्नास्ति साधुत्वप्रयोगयोर्नियम इति प्राप्ते ब्रूमः। साधूनेव शब्दान्प्रयुंजीत नत्वपशब्दानिति अस्ति नियमः उभय
त्रैकमेव गुणदोषवादिनोर्वेदवाक्ययोः श्रवणात्। एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भव
छि तीति गुणवाक्यं तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष [illegible] यदपशब्द इति दोषवाक्यं यथा प्रयो
गे नियमस्तथा साधुत्वे पि नियमो द्रष्टव्यः गवाद्या एव साधवो न तु गाव्यादय इत्यस्मिन्नर्थे व्याकरणस्य निया
मकत्वात्। न च तस्मिन्मूलत्वं सर्वं सर्वं व्याकरणस्य तन्मूलत्वादेतदेवाभिप्रेत्योक्तं। तत्र रूपादिकरणं व्याकरण
परंपरानादित्वादनुपालंभ इति। व्याकरणप्रामाण्ये साक्षाद्वेदवेदोपन्यस्तं। तथा चाथर्वणिका आमनंति।
द्वे विद्ये वेदितव्ये इति ह स्माह यद्ब्रह्मविदो वदंति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोथर्वणवेदः

19

शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति तैत्तिरीयब्राह्मणेऽपि व्याकरणस्योपादेयता श्रूयते। वाग्वै पराच्यव्याकृ-
तावदत्ते देवा इन्द्रमब्रुवन्निमां नो व्याकुर्विति तामिन्द्रो मध्यतोपक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुद्यत इति व्याक-
रणश्च पाणिनिकात्यायनपतञ्जल्योमत्वादि समानाः तस्मात्सुराधनाम्नेव प्रयोगो गणकारी नामैव साधुत्वे व्याक-
रणस्मृतिः प्रमाणं। अत्रैव गुरुमतमाह॥ अश्वालंभनश्रुतावश्वस्य दन्त्यतालव्यसंशयात्। अमात्यैर्दन्त्यनिर्णीति
र्गतो व्याकृतैर्बलात्। अश्वमालभेतेत्यत्राकारवकारयोर्मध्यवर्तिनो वर्णस्य दन्त्यत्वे स्वेधने न दुहितं दृहिर्द्र-
मालभेतेत्यर्थो भवति। तालव्यत्वे तु रंगमवोचितं ततः संशयात्प्रामाण्यमिति चेन्न। व्याकरणानुसारेण
शुव्याप्तावित्यस्माद्धातोरौणादिके क्वन्प्रत्यये कृते तालव्यत्वनिर्णयात्। तस्मादश्वालंभनश्रुतौ प्रमाणं। दृश्यमा-
विकरणे प्रथमवर्णिकमारचयति। अथवै पदपदार्थयोर्भेदो न तौ वेदे यथायात्र तो। रूपभेदात्पदं भिन्नमुतानादिभि-
दास्कूटा। वर्णैकत्वात्सदैकत्वं यथा चिन्ती रूपभिन्नता। प्राप्नुवन्ता पदैक्येन तदर्थैक्यं तथाविधं। वैदिकौ पदपदा-
र्थौ लौकिकाभ्यां पदपदार्थाभ्यामन्यौ कुतः रूपभेदात् पदे तावद्रूपभेदो दृश्यते। अग्निमग्नावद् आकारादिलेन लो-
के नियतः। वेदे तु क्वचिदाकाररहितः पठ्यते। प्र यतं पुरुषं त्मनेति। ब्राह्मणादित्यो वैदेत्यन्यथा पठ्यते ब्राह्मणा

सः पितरः सोम्यास इति। अर्थभेदोपि स्फुटः। उक्ता नाम वेदे वनगा वा वहन्तीति श्रूयते मनुष्यगवा स्ववां चोवहन्तीवेदे वनस्पतीन्हिर
ण्यपर्णः। तथा च श्रूयते देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थमिति तस्मात् लोकवेदयोः पदपदार्थावन्यावितिं
प्राप्ते ब्रूमः। य एव लौकिकाः पदार्थास्त एव वैदिकाः। तथा हि वर्णानां तावन्नित्यत्वं प्रथमे पादे साधितं तथा प्रयोक्तृणां पु
रुषाणां भेदेपि एकैकस्य पुरुषस्य बहुकृत्व उच्चारणभेदेपि त एवामी वर्णा इति प्रत्यभिज्ञानात् वर्णैक्यं तथा यानि लौ
केगवादिपदानि तान्येव वेदे विधीयमानानि इत्यबाधित प्रत्यभिज्ञया पदैकत्वमभ्युपेयं। सनादेवा मद इत्यादि पदभेद
एकदेशविकारेण भेदः।
स्तु धाचित्कः। ते तावन्ताबहुतरप्रत्यभिज्ञावगतं पदैक्यमपोढुं शक्यं अन्यथा सोयं देवदत्त इति प्रत्यभिज्ञाततेवदत्तै
क्यमपि देशादिमात्रेणापोद्येत। पदैक्ये चार्थैकत्वमवश्यंभावि अन्यथा वेदे पदार्थग्रहस्य भावाद्बोधकत्वं प्रस
ज्येत। एतदेवाभिप्रेत्योक्तं। लोकावगतसामर्थ्यः शब्दो वेदेपि बोधकः इति स्वरूपपाहवनीयादिशब्दानां तदर्था
नां चालौकिकत्वेपि प्रसिद्धपदसमभिव्याहारात् व्युत्पत्तिः संभवति। उक्तानवहनादिकं त्वर्थवादः। अस्तु वा तथाव
हनं तथाप्युक्तानादिशब्दास्तदर्थाश्च लोकप्रसिद्धा एव तस्मात् य एव लौकिकाः पदपदार्थास्त एव वैदिकाः। द्विती
यं वर्णकमारचयति। व्यक्तिर्व्रीह्यादिशब्दार्थ आकृतिर्वा क्रियान्वयात् व्यक्तिर्युत्पत्तिवेलायामाकृत्या सोपल

क्ष्यते । शक्तिग्रहणादियुक्तिभ्य आकृतेरर्थतोचिता क्रियापर्यवसानाय व्यक्तिस्तत्रोपलक्ष्यतां ॥२॥ व्रीहीनवहन्तीति पशुमाल-
भेत गामानय ब्राह्मणो न हन्तव्य इत्यादिप्रयोगे पुंस्त्र्यादिशब्दानां व्यक्तिरर्थः कुतः अवहननादिक्रियाभिव्यक्तेरन्यैस्तु
शक्यत्वात् । न ह्याकृतिरवहन्तुमालब्धुमपनेतुं वा योग्या नन्वानन्त्यव्यभिचाराभ्यां न व्यक्तौ व्युत्पत्तिः संभवति अनन्तानां हि
गोव्यक्तयः अतीतानामनागतानामनेकदेशवर्त्तिनां गवामियत्तया अनवधारणात् । किं च खण्डमुण्डव्यक्तौ व्युत्पन्नो
गोशब्दः कृष्णव्यक्तौ प्रयुज्यमानः स्वार्थं व्यभिचरेत् तेन कथं व्युत्पत्तिसिद्धिरिति चेन्न । एवं तर्हि व्युत्पत्तिकाले सा व्यक्ति-
राकृत्योपलक्ष्यतामिति प्राप्ते ब्रूमः । अन्वयव्यतिरेकाभ्यामाकृतेः शक्तिग्रहणनिमित्तत्वात् शब्दार्थत्वं तस्या एवो-
चितं । किं च गोशब्द इत्यादिते व्यक्तिवादिनः संशयो भवेत् । तस्मादाकृतेरेवाभिधेयत्वं यत्त्वाकृतावहननादि
क्रियानपर्यवसानं तर्हि व्यक्तिस्तत्रोपलक्ष्यतां । श्येनचितं चिन्वीतेत्यादावाकृतेर्द्रव्यप्रतियोगितया का-
र्यान्वयो दृश्यते तस्मादाकृतिः शब्दार्थः । अत्रैव गुरुमतमाह । गवादिचोदना नो मा जातिव्यक्त्योरनिर्णयात् । आ-
नन्त्यव्यभिचाराभ्यां न व्यक्तिरिति निर्णयः ॥ स्पष्टोऽर्थः ॥ इति माधवीये जैमिनीयन्यायमालाविस्तरे प्रथमस्याध्या-
यस्य तृतीयः पादः ॥ चतुर्थपादस्य प्रथमाधिकरणं वार्त्तिककारोन्नीतमारचयति ॥ उद्भिदादिपदं धर्मे किमना-

न्मुत प्रमा। विध्यर्थवादमंत्रांशेष्वनंतर्भावतो न मा। ९॥ अंतर्भावो विधावुद्भिदा यजेतेति दृश्यते। नामत्वेनान्वयो वाक्ये वक्ष्य
ते तःप्रमैव तत्। उद्भिदा यजेत विश्वजिता यजेतेत्येवं समाम्नायते। तत्रोद्भिदादिपदं न धर्मे प्रमाणं कुतः प्रमाणत्वेना
भिमतेषु त्रिषु वेदविभागेष्वनंतर्भावात्। तथाहि विधिः साक्षात्प्रमाणं अर्थवादमंत्रौ तु विध्येकवाक्यत्वेन तत्र न तावदु
द्भिदादिपदं विधावंतर्भवतीति विध्यर्थरूपाया भावनाया अंशेषु भाव्यकरणेतिकर्तव्यतारूपेषु कस्याप्यवाचक
त्वात्। नाप्यर्थवादत्वं। स्तुतिबुद्धेरभावात्। नापि मंत्रत्वं। उत्तमपुरुषादीनां मंत्रलिंगानामभावात्। तथा चोक्तं
तैर्मा मंत्रलक्षणं स्यात्त्वांतरूपाद्यभावतः। मंत्रप्रसिद्ध्यभावाच्च मंत्रतैषां न युज्यत इति। अग्नये जुष्टं निर्वपामीत्यु
त्तमपुरुषः। अग्ने यशस्विन्यशसेममर्पयेत्यामंत्रणं। उर्वीचासि वस्वीचासीत्याशीः। इषे त्वोर्जे त्वेति त्वांतरू
पं। आदिशब्देनाशीर्देवताप्रतिपादनाद्यः। एवमादिष्वनंतर्भावात् मानमिति चेत् न। विध्येकदेशत्वेनांतर्भावा
त्। यद्यपि तिङ्पदेन सह समानपदोपात्तोयं त्रिधा विध्यर्थः करणं तथापि तस्य यजेत नामत्वेनोद्भिदादिपदमन्वेति
तस्मात्प्रमाणं। द्वितीयाधिकरणमारचयति॥ गुणो वे नामधेयं वा खनित्रेत्यस्य निरूढिततः अयोति विष्टो मे समा
श्रित्य पशवर्थं गुणचोदना। फलोद्देशासमानेषा निरूढिर्या गमान्यपि। नामत्वमुचितं याग सामानाधिकरण्यतः।

उद्भिदा यजेत पशुकाम इत्यत्र तृतीयान्तेनोद्भित्पदेन योऽर्थो विवक्षितः सोऽयं यागेतरः गुणः स्यात् दध्ना जुहोतीत्यनेन गुण-
विधिना समानत्वात्। अथोच्येत द्विविधार्थो लौकिकः प्रसिद्धः उद्भिच्छब्दार्थस्तत्र प्रसिद्ध इति तन्न। रूढ्यभावे ह्यवय-
वार्थनिरुक्त्या तत्प्रसिद्धेः। उद्भिद्यते भिद्यतेऽनेनेति व्युत्पत्त्या खनित्रवाचकोऽयं शब्दः। न चात्र पशुफलकः कश्चिद्यागो विधी-
यत इति वाच्यं। पशवस्तु गुणफलत्वात्। यथा गोदोहनेन पशुकामस्येत्यत्र पशवो गोदोहनगुणस्य फलं तथेह खनि-
त्रगुणस्य फलमस्तु यदि एवमस्ति नापः प्रणयेदिति विहितं प्रकृतमपां प्रणयनमाश्रित्य गोदोहनं विधीयते तथे-
हापि ज्योतिष्टोमेन यजेतेति विहितं प्रकृतं ज्योतिष्टोममाश्रित्य खनित्रं विधीयतां तस्मात् गुणविधिरिति प्राप्ते
ब्रूमः। पशुकामो यजेतेत्यस्य पदद्वयस्यायमर्थः। पशुरूपं फलं यागेन कुर्यादिति तत्र केन यागेनेत्यपेक्षा-
यां उद्भिदेति तृतीयान्तपदं यागनामत्वेनान्वेति उद्भिद्यते पशुफलमनेन यागेनेति निरुक्त्या नामत्वमुद्भित्पदस्यो-
पपद्यते। एवमपि गुणविधिनामधेयत्वयोः शब्द[illegible] निर्वचनसाम्यादनिर्णय इति चेन्न। सामानाधिकरण्य-
स्य निर्णायकत्वात् उद्भिन्नामकेन [illegible] यागेन फलं कुर्यादित्युक्ते सामानाधिकरण्यं लभ्यते गुणत्वे तु खनित्रेण सा-
ध्यो यो यागस्तेनेत्येवं वैयधिकरण्यं स्यात्। यदि खनित्रवता यागेनेति सामानाधिकरण्यं योज्येत तदा मत्वर्थ

लक्षणा प्रसज्येत तस्मादुद्भिदादिपदं नामधेयं । दध्ना जुहोति व्रीहिभिर्यजेतेत्यादिषु द्रव्यविशेषे दध्यादिशब्दानामसंततरूढतया
यागनामत्वासंभवाद्गत्या गुणत्वमाश्रितं । सोमेन यजेतेत्यत्राप्यप्रसिद्धार्थनामधेयत्वकल्पनातो वरं प्रसिद्धार्थद्वारे
ण लक्षणाश्रयणमित्यभिप्रेत्य सोमद्रव्यवता यागेनेति मत्वर्थलक्षणा स्वीकृता । उद्भिदादेस्तु लोकप्रसिद्धार्थाभा
वादुक्तरीत्या नामत्वं युक्तं । प्रयोजनं तु नाम्नः सर्वत्र व्यवहार एव । नन्वस्तु तदेव नामधेयमक्षिग्वरलोपेनेनाह यक्ष्येद्रव्या खन्या नोपा
योऽल्पधुः कुद्दाल इति तस्मादुद्भिदादिकं नामधेयं अत्रैव गुरुमतमाह लौकिके गणयागे स्वविधेः सापेक्षतेति चेन्न ।
निरूढ्या श्रौतयागस्य नामत्वान्निरपेक्षता । उद्भिदा यजेतेत्यत्र गुणविधिः । न चास्य कश्चिच्छ्रौत आश्रयो लक्ष्यते त
तो लौकिको मात्र गणयागादिराश्रयत्वेनापेक्षणीयः । तस्मिन्यागे गुणोऽयं विधीयते । तथा सति सापेक्षत्वादप्रामा
ण्यमस्याश्चोदनाया इति चेन्मैवं । रूढ्यैव तु निरूढ्या श्रौतयागनामत्वे सति निरपेक्षत्वात् । इतो यागविधिर
एवमाम्नायति ॥ यच्चित्रया यजेतेति तद्गुणो नाम वा भवेत् । चित्रत्वस्त्रीत्वगुणो रूढेरग्नीषोमीयके पशौ । द्वयोर्विधौ
वाक्यभेदो वैशिष्ट्ये गौरवं ततः । स्यान्नामपदमप्राप्यं विशिष्ट्य वर्माने पुनस्तथा ॥ चित्रया यजेत पशुकाम इत्याम्नायते तत्र
चित्राशब्दस्तोद्भिच्छब्दवद्यौगिकः । किं तु रूढ्या चित्रत्वं स्त्रीत्वं चाभिधत्ते ततो न रूढन्यायेन नामत्वं तथा सत्यग्नीषो
मीयं पशुमालभेतेति विहितपशुयागमनूद्य यजेतेत्यनेन पदेनानूद्य तस्मिन्यागे चित्रत्वस्त्रीत्वगुणौ विधीयेते इति प्रा

त

नेकर्मः। चित्रत्वं स्त्रीत्वं चेति द्वावेतौ गुणौ तयोर्विधाने वाक्यं भिद्येत। तथा चोक्तं। प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयेरन्बहवोप्येकयत्नतः इति। अथवाक्यभेदपरिहाराय गुणद्वयविशिष्टपशुद्रव्यरूपं कारकं विधीयते
तदा गौरवं स्यात्। तस्माच्चित्राशब्दः पर्वव प्रति सामानाधिकरण्येन यागनामधेयं भवति चित्रत्वं च तस्य विव-
क्षणद्रव्यद्वारेणोपपद्यते दधिमधुघृतमापोधानास्तण्डुलास्तत्संसृष्टं प्राजापत्यं इति दध्यादीनि विचित्राणि प्र-
देयद्रव्याणि षडाम्नातानि। तदेतच्चित्रानामकस्य यागस्योत्पत्तिवाक्यं यागस्वरूपभूतयोर्दध्यादिद्रव्यप्रजाप-
तिदेवतयोरत्रोपदिश्यमानत्वात्। उत्पन्नस्य तस्य यागस्य चित्रया यजेत पशुकाम इत्येतत्फलवाक्यं एवं सति प्रकृ- यई
तार्थे भिद्येत। अग्नीषोमीयपश्वनुवादेन गुणविधाने प्रकृतहानाप्रकृतप्रक्रियेप्रसज्येयातां लिङ्प्रत्ययस्य
चानुवादत्वं गीसंकानुरव्यो विध्यर्थो बाध्येत। तस्माच्चित्रापदं नामधेयं। यथा चित्राशब्दे नामधेयत्वं तथा
बहिष्पवमानशब्दे आज्यशब्दे पृष्ठशब्दे च तत्तत्कर्मनामधेयत्वं योजनीयं। एवं हि श्रूयते त्रिवृद्बहिष्पवमानं पंचदशा-
न्याज्यानि सप्तदशानि पृष्ठानीति अस्य वाक्यत्रयस्यार्थो विव्रियते। सामगानामुत्तरग्रन्थे तृचात्मकानि सूक्तान्याम्नाता-
नि तत्रोपास्मै गायता नर इत्यादि सूक्तं दविद्युतत्या रुचेति द्वितीयं पवमानस्य ते कव इति तृतीयं। ज्योतिष्टोमस्य प्रा-
तःसवनानुष्ठाने तेषु त्रिषु सूक्तेषु गायत्रं साम गातव्यं। तदिदं सूक्तत्रयगानसाध्यं स्तोत्रं बहिष्पवमानमित्युच्यते।

तत्रावस्थितानामृचां पवमानार्थत्वाद्बहिः संबंधाच्चैनं सर्वत्रेदं स्तोत्रं इतरस्तोत्रवत्सदोनामकस्य मंडपस्य मध्ये तु दुंबर्याः स्तंभशाखा
याः संनिधौ प्रयुज्यते किंतु सदसो बहिः प्रसर्पद्भिः प्रयुज्यते तस्य च बहिष्पवमानस्य त्रिवृन्नामकः स्तोमो भवतीति तस्य च स्तोम
स्य विधायकं ब्राह्मणवाक्यमेवमाम्नायते। तिसृभ्यो हिंकरोति स प्रथमया तिसृभ्यो हिंकरोति स मध्यमया तिसृभ्यो
हिंकरोति स उत्तमयोद्यती त्रिवृतो विष्टुतिरिति। अयमर्थः सूक्तत्रयगतानां नवानामृचां गानं त्रिभिः पर्यायैः कर्तव्यं
तत्र प्रथमपर्याये त्रिषु सूक्तेषु आद्यास्तिस्र ऋचः द्वितीये पर्याये मध्यमाः तृतीयपर्याये चोत्तमाः तिसृभ्य इति
तृतीयार्थे पंचमी हिंकरोतीति गायतीत्यर्थः। स्वयं यथोक्तप्रकारोपेता गीतिस्त्रिवृत्स्तोमस्य विष्टुतिः स्तुतिप्रकारविशेषः।
अस्या विष्टुतेरुद्यती नामेति। एवं परिवर्तिनी कुलायिनीति द्वे विष्टुती तयोः परिवर्तिन्येवमाम्नायते। तिसृभ्यो हिंकरोति
स पराचीभिः तिसृभ्यो हिंकरोति स पराचीभिः तिसृभ्यो हिंकरोति स पराचीभिः परिवर्तिनी त्रिवृतो विष्टुतिरिति।
पराचीभिरनुक्रमेणाम्नाताभिरित्यर्थः। कुलायिन्येवमाम्नायते तिसृभ्यो हिंकरोति स पराचीभिस्तिसृभ्यो हिंक
रोति। या मध्यमा सा प्रथमा। योत्तमा सा मध्यमा। या प्रथमा सोत्तमा। तिसृभ्यो हिंकरोति योत्तमा सा प्रथमा या
प्रथमा सा मध्यमा या मध्यमा सोत्तमा कुलायिनी त्रिवृतो विष्टुतिरिति। अत्र प्रथमसूक्ते पाठक्रम एव द्वितीये मध्य
मोत्तमप्रथमाः तृतीये तूत्तमप्रथममध्यमा इत्येवं मंत्राणां गातव्याः तदिदं विष्टुतित्रयं विकल्पितं त्रिवृच्छंद स्वेद

२३

शंस्तोमस्वरूपमर्थोन्नतुश्रेणुण्णमिति दर्शपादेनिर्णीतं । उक्तग्रन्थे बहिष्पवमानसूक्तेभ्यस्त्रिभ्य ऊर्ध्वं चत्वारि सूक्तान्याम्नातानि । अग्न आयाहि वीतये इत्याद्यं सूक्तं आ नो मित्रावरुणेति द्वितीयं आयाहि सुषुमाहि त इन्द्र [illegible] ति तृतीयं । इन्द्राग्नी आगतं सुतमिति चतुर्थं । तान्येतानि प्रातःसवने गायत्रसाम्ना गीयमानानि चत्वार्याज्यस्तोत्राणीत्युच्यन्ते । तन्निर्वचनं श्रूयते । यदाजिमीयुस्तदाज्यानामाज्यत्वमिति । तेष्वाज्यस्तोत्रेषु पञ्चदशनामकः स्तोमो भवति तस्य स्तोमस्य विष्टुतिरेवमाम्नायते । पञ्चभ्यो हिंकरोति स तिसृभिः स एकया स एकया पञ्चभ्यो हिंकरोति स एकया स तिसृभिः स एकया पञ्च भ्यो हिंकरोति स एकया स एकया स तिसृभिरिति सैकस्तृचं त्रिरावर्तनीयं । तत्र प्रथमावृत्तौ प्रथमाया ऋचः त्रिरभ्यासः द्वितीयावृत्तौ मध्यमायास्तृतीयावृत्तावुत्तमायाः सोऽयं पञ्चदशस्तोमः । उक्तेभ्यश्चतुर्भ्यः सूक्तेभ्य ऊर्ध्वमुक्तग्रन्थे त्रीणि माध्यंदिने पवमानसूक्तान्याम्नायन्तत ऊर्ध्वं चत्वारि सूक्तान्याम्नातानि तेष्वभि त्वा शूर नोनुम इत्याद्यं कया नश्चित्र आभुवदिति द्वितीयं । तं वो दस्ममृतीषहं इति तृतीयं तरोभिर्वो विदद्वसुमिति चतुर्थं एतानि क्रमेण रथन्तरवामदेव्यनौधसकालेयसामभिर्माध्यंदिनसवने गीयमानानि पृष्ठस्तोत्राणीत्युच्यन्ते स्पर्शनात्पृष्ठानीत्येवं निरुक्तिर्द्रष्टव्या । तेषु स्तोत्रेषु सप्तदशस्तोमो भवति तस्य स्तोमस्य विष्टुतिरेवमाम्नायते पंचभ्यो हिंकरोति स तिसृभिः स एकया स एकया पंचभ्यो हिंकरोति स एकया स तिसृभिः स एकया सप्तभ्यो हिंकरोति स एकया स तिसृभिः स तिसृभिरिति । अत्र प्रथमावृत्तौ प्रथमाया ऋचस्त्रिरभ्यासः

द्वितीयावृत्तौ मध्यमायाः तृतीयावृत्तौ मध्यमोत्तमयोः सोऽयं सप्तदशस्तोमः अत्र त्रिवृदादिवाक्येषु त्रिवृत्पञ्चदशसप्तदश-
शब्दा गुणविधायकत्वेन न संमताः। यदि बहिष्पवमानाद्यष्टशब्दा अपि गुणविधायकाः स्युस्तदा प्रत्युदाहरणे गुणद्वयवि-
धानाद्वाक्यभेदः स्यात्। तस्माद्बहिष्पवमानादिशब्दाः स्तोत्रनामधेयानि। तैर्नामभिः कर्माण्यनूद्य त्रिवृदादिगुणा वि-
धीयन्ते। चतुर्थं चित्रकर्मनामोदाहरणमारचयति। अग्निहोत्रं जुहोति साधारमाधारयतीत्यत्र विधेयो गुणस्तस्याभावाद्धोत्रकर्म
नामनी। अग्नये होत्रमत्रेति बहुव्रीहिमतो न तत्पुः गुणो विधेयो नामत्वे रूपं न स्यात् तत्र समस्यते। तत्प्रख्या साधारमाधा-
रयतीत्युक्ता द्वितीयया। आघारे त्वग्निहोत्रेति यौगिके कर्मनामनी। अग्निर्ज्योतिरिति प्रोक्तो मन्त्रादेव तथा घृतं।
चतुर्गृहीतवाक्येभ्यो द्वितीयायास्त्वियं गतिः। नासाधितेऽहि धात्वर्थे करणत्वं ततोऽस्य सा साध्यतां वेति संस्कारो
नैवाग्न्युक्यः क्रियात्वतः। अग्निहोत्रं जुहोतीत्यस्याग्निहोत्रशब्दस्य कर्मनामत्वे द्रव्यदेवतयोरभावात् यागस्य स्वरूप-
मेव न सिध्येत्। ततोऽग्निर्देवताकश्चिद्गुणोऽनेन दधिव्रीहिमद्विधीयते। आघारशब्दस्य चरणादाभ्योद्वित्यस्माद्धातो रूपन्नः
क्षरणदे तस्माद्वक्षमाणादि घृतद्वितीयाविभक्त्या संस्कार्यत्वं प्रतीयते। तच्च संस्कृतं घृतमुपांशुयाजे द्रव्यं भवति। त-
स्मादग्निहोत्राघारशब्दौ गुणसंस्कारयोर्विधायकाविति प्राप्ते ब्रूमः। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहो-
ति। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति विहितेन मन्त्रेण प्राप्तत्वाद्देवता न विधेया। ततोऽग्निसूर्यदेवता

ऋस्य सायंप्रातःकालयोर्नियमेनानुष्ठेयस्य कर्मणोऽग्निहोत्रमिति यौगिकं नामधेयं। योगश्च बहुव्रीहिणा द्रष्टव्यः। चतुर्गृही-
तं वा एतदभूत् तस्याघारमाघार्यैतेनैव वाऽऽज्यद्रव्यस्य प्राप्ततया क्षरत् घृतसंस्कार[illegible]स्याविधेयत्वादाघारशब्दोपि
यौगिकं कर्मनामधेयं। यस्मिन् कर्मणि तैर्ध्वां दिशमारभ्यैशानीं दिशमवधिं कृत्वा संततमाघारं क्षारयति तस्य
कर्मण एतन्नाम। ननु नामधेयत्वे सति द्रव्यपदेनेत्योतिष्टोमेन यजेतेत्यादाविव धात्वर्थेन करणेन सामाना-
धिकरण्यायाग्निहोत्रं जुहोत्याघारमाघारयतीति तृतीयया भवितव्यं नैष दोषः। अनुवाद्याद्धात्वर्थस्य
सिद्धत्वाकारेण करणत्वेऽपि ततः स्वर्गसाध्यत्वाकारेण कर्मण्यग्निहोत्रमाघारमिति द्वितीयायायुक्तत्वात्। न
चात्र द्वितीयानुसारेण व्रीहीन् प्रोक्षतीत्यादाविव संस्कारः शंकनीयः। व्रीहिशब्दवदग्निहोत्राघारशब्दयोः प्रसि-
द्धद्रव्यवाचकत्वाभावेन क्रियावाचित्वाभ्युपगमात्। तस्मादग्निहोत्राघारशब्दौ द्विविहितमोपांशुपात्रयोर्गु-
णसंस्कारविधायिनौ न भवतः। किं तु कर्मान्तरयोर्नामनी। पंचमाधिकरणमारचयति॥ श्येनेनाभिचरन्
यजेतेति श्रुतो गुणः। विधीयते पक्षिरूपो नाम वा तस्य कर्मणः॥१॥ श्येनेनेति गुणः काम्यः सोमिकः सोमबा-
धकः। न चित्रावद्वाक्यभेदो रूढत्वं वमनुग्रहः॥२॥ यथा वै श्येनद्रसुत्काद्युपमानोपमेयता। नैकस्मिं स्तेन

गोत्याख्यस्य स्वास्याकर्मनामता ॥ ३ ॥ श्येनेनाभिचरन्यजेतेति अत्र नामत्वे द्रव्यदेवतयोरभावाद्यागस्वरूपमविन
सिद्ध्येत् । ततः सोमयागे निर्त्वं सोमद्रव्यं बाधित्वा सोमस्य स्थाने पक्षिद्रव्यरूपो गुणः कामो विधीयते तथा च श्येन
शब्दस्य पक्षिणि लक्षणाप्रसिद्धरूढिरप्युपगता भवति । न च गुणविधित्वे चित्रायामिव वाक्यभेद आपाद्यते तु शब्दस्य
चित्रत्वे स्त्रीत्ववत् गुणद्वयाभावादिति प्राप्ते अभ्यः । यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यमादत्ते यमभि
चरति श्येनेनेति वाक्यशेषेणोपमानोपमेयभावः पक्षिण्येव स्थितेन युज्यते तस्मात्पक्षिण उपमानस्य गुणउ
पमेयेकर्मणि असत्वीति श्येनशब्दस्याभिचारकर्मनामत्वे । संदंशेनाभिचरन्यजेत गवाभिचरन्यजेतेत्यत्र
संदंशगोशब्दयोर्नामत्वं श्येनशब्दवद्द्रष्टव्यं । यथा संदंशेन दुरादानमादत्ते यथा गावो गोपायन्तीति वाक्यशेषा
भ्यामुपमानोपमेयभावाभिधानात् । पञ्चाधिकरणमाह वाजपेयेनेति ॥ यजेत वाजपेयेन स्वाराज्यार्थी स्थितो गुणः ।
नामत्वाद्गुणता तत्र योगात्फलद्वये ॥ १ ॥ साधारणयजेः कर्मफलत्वेन तन्नता । त्रिकद्वयं विरुद्धं स्यात्तन्नतायां फलं
प्रति ॥ २ ॥ उपादेयविधेयत्वे गुणत्वात्संव्यत्रिकं यजेः । उद्देश्यत्वेन किं मुख्यत्वे त्रिकं तस्य गुणं प्रति । उत्पत्तौ तत्र
तदादित्सौवाक्यं भिद्येत तेन सः । वाजपेयेति शब्दो पि कर्मनामापि निहित्रवतः ४ वाजपेयेन स्वाराज्यकामो यजेतेति
एव वाजपेयशब्देन गुणो विधीयते । अन्नवाची वाजशब्दः तस्मान्नं पेयं सुराद्रव्यं तस्मान्नगुणः सुराग्रहाणामनु

देयत्वात्। ननु गुणत्वे वाजपेयगुणवता यागेन स्वाराज्यं भावयेदिति सेवं मत्वर्थलक्षणा प्रसज्येत। मैवं। सकृदुच्चरित
स्य पदे तस्य स्वाराज्यान्वय वाजपेयगुणे स्वाराज्यफले च तंत्रेण संबंधांगीकारात्। वाजपेयेन इष्ट्वा स्वाराज्याय य
जेतेत्येवमुभयसंबंधः। ननु गुणसंबंधे सति वाजपेयगुणेन यागं कुर्यादिति यजेः कर्मकारकत्वं भवति फलसं
बंधे तु यागेन स्वाराज्यं संपादयेदिति करणकारकत्वं ततः कथमुभयसंबंध इति चेत् नायं दोषः यजेः साधा
रणत्वेन द्विरूपत्वसंभवात् यजेतेत्यत्र प्रकृत्या यागः उक्तः प्रत्ययेन भावना उक्ता तयोस्तु समभिव्याहारात् संबंधमात्रं ग
म्यते तत्र कर्मत्वकरणत्वयोः साधारणं न खलु तत्र कर्मत्वस्यैव करणत्वस्य वा साक्षादभिधायिका काचिद् साधा
रणी विभक्तिः श्रूयते अतः साधारणस्य यजेरुभाभ्यां युगपत्संबंधे सति यथोचितसंबंधविशेषः पर्यवस्यति ए
वं तंत्रेण संबंधांगीकारे वाजपेयद्रव्येण यागं कुर्यादित्यर्थस्य लभ्यमानत्वात् गुणविधित्वेपि नास्ति मत्वर्थलक्ष
णा यद्युद्दिश्यादिष्वप्येवं गुणविधिः स्यात् तर्हि तान्यपि वाक्यान्यत्रोदाहृत्य तदीयः सिद्धांतः पुनराक्षिप्यतामिति
प्रासंगिकः। यजतेस्तंत्रेणोभयसंबंधे सति विरुद्धत्रिकद्वयापत्तिः स्यात् उपादेयत्वं गुणत्वं विधेयत्वं चेत्येकं त्रि
कं उद्देश्यत्वमनुवाद्यत्वं मुख्यत्वं चेत्यपरं त्रिकं तत्रोद्देश्यत्वादयस्त्रयः स्वाराज्यफलनिष्ठा धर्माः उपादेय
त्वादयस्त्रयः साधनभूतयजिनिष्ठाः धर्माः फलमुद्दिश्य यजिरुपादीयते फलमनूद्य यजिर्विधीयते फलं प्र

मनः॥

धानं यजिरुपसर्जनं फलस्योद्देश्यत्वं नाम मानसापेक्षो विषयत्वाकारः यजेरुपादेयत्वं नामानुष्ठेयमानत्वाकारः तावु
भौ मनःशरीरोपाधिकौ धर्मौ अनुवाद्यत्वविधेयत्वधर्मौ तु शब्दोपाधिकौ ज्ञातस्य कथनमनुवादः अज्ञातस्यानु
ष्ठेयत्वकथनं विधिः। फलयागयोः साध्यसाधनत्वरूपतया प्रधानत्वोपसर्जनत्वे एवं सति फलतत्साधनयोः स्वा
राज्ययागयोः स्वभावपर्यालोचनायां यथा फलस्योद्देश्यत्वादित्रिकं यागस्योपादेयत्वादित्रिकं व्यवतिष्ठते
तथा यागस्य वाजपेयस्य च साध्यसाधनभावपर्यालोचनायां यथा फलस्योद्देश्यत्वादित्रिकं वाजपेयद्रव्यस्योपा
देयत्वादित्रिकं च पर्यवस्यति ततो यागस्य फलद्रव्याभ्यां युगपत्संबंधे सति विरुद्धत्रिकद्वयमापद्यते ननु त
र्हि मा भूत् तत्रैकेन भयसंबंधः पृथक् संबंधाय यजिरावर्त्यतामिति चेन्न वाक्यभेदप्रसंगात्। द्रव्येण यागं कु
र्यात् इत्येकं वाक्यं यागेन फलं कुर्यात् इत्यपरं तस्मात् वाजपेयशब्दो न गुणविधायकः किं तु यथोक्तं द्रव्यंनि
मित्तीकृत्य अग्निहोत्रशब्दवत् कर्मनामधेयं। सप्तमाधिकरणमारचयति॥ यदाग्नेयोऽष्टाकपाल इति ना
मगुणोऽथवा। नामाग्निहोत्रवन्नैवं नाम स्वेदेवतानहि। मंत्रोपि नेह प्रत्यक्षस्ताद्धिताद्देवताविधिः देवद्रव्यविशिष्टस्य
विधानादेकवाक्यता। दर्शपूर्णमासयोः श्रूयते। यदाग्नेयोऽष्टाकपालो मावास्यायां पौर्णमास्यां चाच्युतो

भवति तत्र यथाग्निहोत्रशब्दो ऽग्नये होत्रमत्रेति समुमर्थे निमित्तीकृत्य कर्मनामधेयं तथाग्नेयशब्दो ऽपि अग्निसंबंधं निमित्तीकृत्य कर्म
नाम स्यादिति चेत् न एवं नामत्वे देवताराहित्यप्रसंगात् अग्निहोत्रे तु अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीत्यनेन
विहितो मंत्रः प्रसक्तविहित इति मांत्रवर्णिकी देवता लभ्यते इह तु न तादृशो मंत्रोऽस्ति आग्नेयशब्दस्तु देवतां विधा
तुं शक्नोतीति अग्निर्देवता अस्येत्यस्मिन्नर्थे तद्धितस्योत्पन्नत्वात् । न च द्रव्यदेवतयोरुभयोर्गुणयोर्विधाने वाक्यभे
द इति शंकनीयं कर्मणो प्राप्तत्वेन गुणद्वयविशिष्टस्य कर्मण एकेन वाक्येन विधानात् तस्मादाग्नेयशब्देन देव
ता गुणो विधीयते अत्र गुरुमतमाह ॥ यत्स्तेन यद्वेति प्रोक्तं न मानं विधिसंभवात् । इति चेन्न विशिष्टार्थविधे
स्सप्रमाकृतः ॥१॥ उदाहृतवाक्ये देवताराहित्यप्रसंगेन नामत्वाभावात् गुणयोर्विधौ वाक्यभेदात् विध्यसंभ
वात् प्रामाण्यमिति पूर्वः पक्षः ॥ गुणद्वयविशिष्टकर्मविधिसंभवात् प्रामाण्यमिति सिद्धांतः । अत्र नामाधिक
रणमारचयति ॥ बर्हिराज्यपुरोडाशशब्दाः संस्कारवाचिनः । लोक्यर्थो वा शास्त्ररूढेः स्युः संस्कारवाचिनः ॥१॥
जातिसत्कान संस्कारे प्रयुक्तो लोकवेदयोः । विनापि संस्कृतिं लोके दृष्टत्वाज्जातिवाचिनः ॥२॥ दर्शपूर्णमासयोः
श्रूयते बर्हिर्लुनाति आज्यं विलापयति पुरोडाशं पर्यग्निकरोतीति तत्र बर्हिरादिशब्दानां शास्त्रे सर्वत्र संस्कृते
ष्वेव तृणादिषु प्रयोगात् पील्वादिशब्दवच्छास्त्रीयरूढिप्राबल्यस्योक्तत्वात् यूपाहवनीयादिशब्दवत्संस्कारवा

संस्कारप्रवृत्तिनिमित्तकः ॥

चिनो बर्हिरादिशब्दा इति चेत् नैवं अन्वयव्यतिरेकाभ्यां जातिवाचित्वात् यत्र यत्र बर्हिरादिशब्दप्रयोगस्तत्र तत्र जातिरि
त्यस्या व्याप्तेर्लौकिकवैदिकवचनास्ति व्यभिचारः संस्कारव्याप्तेस्तु लौकिकप्रयोगे व्यभिचारो दृश्यते कश्चिद्देशविशे
षे लौकिकव्यवहारे जातिमात्रमुपजीव्य विनासंस्कारं तेशब्दाः प्रयुज्यन्ते। बर्हिरादाय गावो गता इति कस्यचित् आ
ज्ञप्तिरिति। पुरोडाशेन मे माता प्रहेलकं ददातीति च। तस्माज्जातिवाचिनः प्रयोजनं तु बर्हिषा यूपावटवे मस्त
णातीत्यत्र विनासंस्कारेण स्तरणसिद्धिः। अत्र गुरुमतमाह। बर्हिरादेर्निमित्तस्य दुर्वचत्वान्नैवमिति चेत्।
जातेस्तत्र निमित्तत्वात्तु घुष्टा चोदनाप्रमा। स्पष्टोऽर्थः। नवमाध्यायरूढिकरणमारचयति॥ प्रोक्षणीः संस्कृति
जातिर्योगो वा सर्वमप्रमितेषु तयोर्हेतुः संस्कृतिर्जातिः स्याद्रूढेः प्रबलत्वतः। अन्योन्याश्रयतो नाद्योऽन जातिः
कल्प्यशक्तितः। योगः स्यात्तद्रूढमज्ञात्वा तद्रूढिमिर्व्याकरणाद्भवेत्॥२॥ दर्शपूर्णमासयोः श्रूयते। प्रोक्ष
णीरासादयतीति तत्र प्रोक्षणीशब्दस्याभिमन्त्रणासादनादि संस्कृतिः प्रवृत्तिनिमित्तं कुतः सर्वेषु वैदिकप्र
योगप्रदेशेषु संस्कृतानामेवापां प्रोक्षणीशब्देनोच्यमानत्वादित्येकः पक्षः। लोके जलकणक्रीडायां प्रोक्ष
णीभिरुद्वेजिताः स्म इत्यसंस्कृतास्वप्सु प्रयोगाद्बर्हिरादिशब्दवज्जातौ रूढत्वादुदकत्वजातिः प्रवृत्तिनिमित्तं।

नवभक्तर्वेलोक्ष्यते आग्निरिति योगोत्रपर्यालोचनीयः। रूढेः प्रबलत्वादिति पक्षान्तरं। तत्र न तावत्संस्कारो युक्तः अन्योन्याश्रय
त्वात्। विहितेष्वभिमंत्रणादिषु संस्कारेष्वनुष्ठितेषु पश्चात्संस्कृतास्वप्सु प्रोक्षणीशब्दप्रवृत्तिः तत्प्रवृत्तौ सत्यां प्रोक्ष
णीशब्देनोपात्तस्याभिमंत्रणादिविधिरिति। नापि जातिपक्षो युक्तः उदकजातौ प्रोक्षणीशब्दस्य दृष्टव्यवहारे पूर्वम
प्रसक्तत्वेनेतः परं शक्तेः कल्पनीयत्वात्। ततो गोशब्दवदश्वकर्णशब्दवच्च रूढो न भवति योगस्तु व्याकरणे [illegible] स्मृतः
सोपसर्गादुक्षतेः करणे ल्युट् प्रत्ययेन व्युत्पादनात्। तस्मात्प्रोक्षणीशब्दो यौगिकः। एतादृशः प्रोक्षणत्वं प्रयोजनं।
दर्शमासाधिकरणमारचयति॥ रूढिर्योगो योगरूढिर्वाग्निर्मथ्यस्य वर्तने। आद्यौ पूर्ववद्दुष्टौ चिरजातेन विनीत
वत्॥१॥ अग्निचयने श्रूयते। निर्मथ्येनेष्टकाः पचंतीति तत्र निर्मथ्यशब्दस्य स्वार्थे वह्निरूढिरिति सं[illegible]शाये
बर्हिरादिशब्दवत् लौकिकवैदिकसाधारण्यात् वह्निजातौ रूढिरित्येकः पक्षः। प्रोक्षणीशब्दवद्रूढेरशक्यत्वा
दरणिनिर्मथनजन्यत्वाद्योगादिति पक्षान्तरं। लौकिकनिर्मथनेन चिरनिर्मथनेन च जन्यत्वावस्थायामपि तु योगरूढिः
पंकजादिशब्दवदाश्रयणीया। आधानकाले निर्मथ्य गार्हपत्ये नित्यं धृतोग्निश्चिरनिर्मथितः सद्य एव वा
लौकिकमंथनेन जातोग्निरचिरनिर्मथितः तेनेष्टकाः पच्यंते यथा पुराणे [illegible] तनयोर्घृतयोर्नवनीतजन्य
त्वे समानेपि योगरूढ्या तत्क्षणजन्यमेव नावनीतमिति व्यवह्रियते तद्वत्॥ एकादशाधिकरणमारचयति॥ बाहु

27

मीमांसापपर्वं प्रोक्षा ... यायां प्रक्रान्तिके । वैश्वदेवेनेति शब्दो गुणः संघस्य नाम वा ॥१॥ नामत्वे रूपग्राहित्वाद्विधिर्गुण
तानतः । अग्न्यादिभिर्विकल्प्यं तेन विश्वेदेवाः समस्तु ॥२॥ अन ... यजेतेति तत्संघे नामवर्णितं । अविधित्वेप्यर्थव
त्या नाम प्राकृप्रवणादिषु ॥३॥ द्रव्यं ते यजेत वा विश्वेदेवाद् ... । निरूढिर्न विकल्प्यः स्याद्गुणत्वे पुनरन्यथा शिष्ट
तः ॥४॥ चातुर्मास्ययागस्य चत्वारि पर्वाणि वैश्वदेवो वरुणप्रघासः साकमेधः शुनासीरीयश्चेति तेषु प्रथ
मे पर्वण्यष्टौ यागा विहिताः आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौ
ष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमिति तेषामष्टानां यागानां संनिधावि द
माम्नायते वैश्वदेवेन यजेतेति तत्राग्नेयादीन्यागान्यजेतेत्यनूद्य वैश्वदेवशब्देन देवतारूपो गुणस्तेषु विधीयते
यद्यपि वैश्वदेव्यामामिक्षायां विश्वेदेवाः प्राप्तास्तथाप्याग्नेयादिषु सप्तसु यागेष्वप्राप्तत्वाद्विधीयंते तेष्वप्यग्न्या
दिदेवताः सन्तीति चेत् तर्हि समभावात्तेषु देवताविकल्प्यंतां नामधेयत्वे तु नाममात्रस्याविधेयत्वात् द्रव्य
देवतयोरभावेन यागस्यात्र स्वरूपासंभवात् अयमालोविधिरनर्थकः स्यात् तस्माद्गुणविधिरिति प्रा
प्ते ब्रूमः । उत्पत्तिवाक्येषु विहितानाग्नेयादीनष्टौ यागाननूद्य यजेतेत्यनूद्य तेषां संघे वैश्वदेव [illegible] नामत्वेनोप
वर्ण्यते न च विधित्वाभावे [illegible] नामोपदेशवैयर्थ्यं । प्राचीनप्रवणे वैश्वदेवेन यजेत इत्यादिषु वैश्वदेवशब्द

नैवं वैश्वाष्टानां संघस्य व्यवहर्तव्यत्वात्। नामप्रवृत्तिनिमित्तभूतानि कृत्स्नानि धा आमिक्षायागे विश्वेषां देवानामिज्यमान
तया तत्सहचरितार्थानां सर्वेषां छत्रिन्यायेन वैश्वदेवत्वं अथवा विश्वेदेवा अष्टानां कर्तार इति वैश्वदेवत्वं तथा
चेष्टानामन्यत्र यद्वैश्वदेवाः समयजंत तद्वैश्वदेवस्य वैश्वदेवत्वमिति देवताविकल्पस्तु समानबलत्वाभावान्न यु
ज्यते आग्न्यादयस्तु त्रिविशिष्टत्वात्सबलाः विश्वेदेवास्तु न विशिष्टत्वाद्दुर्बलाः तस्माद्वैश्वदेवशब्दः कर्मनामधेयं।
अत्र गुरुमतमाह॥ गुणनामत्वसंदेहादप्रमाचोदनेति चेत् नो छत्रिन्यायेन संघस्य नामधेयत्वनिर्णयात्तु
स्पष्टोऽर्थः॥ द्वादशादिवत्कस्मात्प्रमा सूचयति॥ यद्द्वादशकपाले ऽष्टौ वैश्वानरीये अनंतरं श्रुतमष्टाकपालादि तद्गुण
नामवा स्तुतिः॥ अंतर्भावादष्टतादेर्नाम स्यादग्निहोत्रवत् द्रव्यद्व्यान्तरे नो चेत् गुणस्तु फलेत्वसौ वा वाक्ये
क्यमुपसंहारात् विस्पष्टं तत्तु बाध्यते नोतो गुणविधौ तस्माद्द्वादशाष्टादिसंस्तुतिः॥ एकादश्येषि [illegible] श्रूयते।
वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपा
लस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवा
स्मिन्निन्द्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिन्पशून् दधाति यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव स तेज
स्व्यन्नाद इन्द्रियावी पशुमान्भवतीति अत्राष्टत्वादिसंख्यासामान्यात्पुरोडाशादौ नो गायत्र्यादिरूपत्वकल्पना

कृताइति । विधायकवाक्ये येयं द्वादशसंख्या तस्यामष्टत्वादिसंख्यानामंतर्भावात् ताः संख्या निमित्तीकृत्याग्निहोत्रशब्दव
दष्टाकपालादिशब्दाः कर्मनामधेयानीत्येकः पक्षः । नात्र द्वादशकपालशब्दः संख्यापरः किं तु पुरोडाशद्रव्यपरः द्वा
दशसु कपालेषु संस्कृत इति व्युत्पत्तेः । एवमेवाष्टाकपालादिशब्दा अपि तथा सति द्रव्यस्य द्रव्यांतरेऽन्तर्भावा
न्नामधेयत्वनिमित्तं नास्तीति चेत् एवं तर्हि पुरोडाशद्रव्यरूपो गुणो विधीयतां न चोत्पत्तिशिष्टद्वादशकपालपुरोडाशावरु
द्धत्वादष्टाकपालादेरनवकाश इति वाच्यं । अष्टत्वसंख्यायाः कपालायत्तविध्युपपत्तेरित्यपरः पक्षः । अयमप्यनुपपन्नः ।
बहूनां गुणानां विधौ वाक्यभेदापत्तेः । न च भिन्नार्थत्वेनैतानि वाक्यानीति वाच्यं । वैश्वानरं द्वादशकपालं निर्वपेदिति
विहितस्य यज्ञियं जातप्रतीतामित्युपसंहारेण वाक्यैकत्वावगमात् । तस्माद्दृष्टाकपालादिषु संज्ञा द्वादशकपा
लः स्तूयते । अत्र गुरुमतमाह ॥ अगुणत्वादनामत्वादमन्त्रत्वादनन्वये । अष्टत्वाद्यप्रमाणं चेत्तन्नार्थवादता
यान्वयात् । उक्तरीत्या गुणत्वं नामत्वं च न संभवति । उत्तमपुरुषाद्यभावान्न मंत्रत्वं । अतः अष्टाकपालादीनाम
नन्वयादप्रामाण्यं वाक्यस्येति चेन्न सैवं स्याद्यदि तेनान्वयस्याकृतत्वात् त्रयोदशादिषु द्वादशत्वाभावात् नयति यजमानः
प्रशस्तो यत्र गुणो वा नाम वा स्तुतिः सामानाधिकरण्येन स्यादेकं स्यादन्यनामता १ गुणो वा यजमानो वस्तु कार्यप्रशस्त
त्वलक्षितोऽर्थवादश्रिताद्यभावेन नात्र संस्तुतिः २ अर्थभेदादनामत्वं गुणत्वं चान्द्र गृह्यते यतस्सः प्रागसाध्यकृताद्वारा

विधेयप्रस्तरस्तुतिः।४। इदमाम्नायते यजमानः प्रस्तर इति। तत्र यजमानस्य प्रस्तरशब्दो नामधेयं प्रस्तरस्य वा यजमानशब्दो नाम
धेयं कुतः उभयोरपि यागेनैतत्साधनत्वाविशेषात् सामानाधिकरण्यादिसंशयः पक्षः गुणविधिरेवेति परः पक्षः तदापि यजमानकार्ये यजमानोऽप्र
स्तरस्याचेतनस्य सामर्थ्याभावात् गुणत्वं नास्ति प्रस्तरकार्ये तु स्रुग्धारणादौ यजमानस्य शक्तत्वात् यजमानरूपो गुणो विधी
यते एवं सति पश्चाच्छ्रुतस्य प्रस्तरशब्दस्य कार्यलक्षकत्वेपि प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्भविष्यति न चात्र पूर्वन्या
येन स्तुतिः संभवति अग्नावुपालकूटादशाकपालयोरिव प्रस्तरयजमानयोः संबन्धाभावात् पूर्ववत्स्वेपिष्टादेवता .कृते
वह्न्याद्युपाद्वित् स्तुतिरितिचेत् न। क्षिप्रत्वादिधर्मवत्कस्यचिदुत्कर्षस्याप्रतीतेः। तस्मान्नाम गुणयोरन्यतरत्व
मिति प्राप्ते ब्रूमः। गोमहिषयोरिवार्थभेदस्यात्यन्तप्रसिद्धत्वान्नामत्वं न युक्तं। गुणपक्षे त्वग्नौ प्रहरणस्य प्रस्तरका
र्यत्वाद्यजमाने प्रहृते सति कर्मलोपः स्यात् तस्माद्विधेयः प्रस्तरो यजमानशब्देन स्तूयते यथा सिंहो देवदत्त इत्यत्र सिं
हगुणेन शौर्यादिनोपेतो देवदत्तः सिंहशब्देन स्तूयते तथा यजमानगुणेन यागसाधनत्वेन युक्तः प्रस्तरो यज
मानशब्देन स्तूयते एवं यजमान एककपाल इत्यादिषु द्रष्टव्यं॥ चतुर्दशाधिकरणमारचयति॥ आग्नेयो ब्राह्म
ण आपि सर्वत्र निर्णयः। दूरं तु मुख्यमन्यत्वमाग्नेयत्वेन संस्तवे। इदमाम्नायते। आग्नेयो वै ब्राह्मण इ
ति अत्रात्यन्तप्रसिद्धार्थभेदत्वादाग्नेयशब्दो ब्राह्मणस्य नामधेयं नाप्यग्निदेवतारूपो गुणो विधीयते आ
ग्नेयं सूक्तमाग्नेयं हविरित्येवं देवतातद्धितस्य सूक्तहविर्विषयत्वात् न ब्राह्मणः सूक्तं नापि हविः अतः

संबंधवाचित्वं तेनाग्नेयशब्देन ब्राह्मणः स्तूयते। यद्यपि ब्राह्मणे नाग्निसंबन्धः तथाप्यग्निसंबंधो मुखजत्वं चान्यत्र गुणो
ब्राह्मणे विद्यते तथा चाग्निब्राह्मणयोर्मुखजन्यत्वं कस्मिंश्चिदर्थवादे समाम्नायते प्रजापतिरकामयत प्रजाः
सृज्येयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री छन्दो रथंतरं साम ब्राह्मणो मनुष्याणामजः पशू
नां तस्मात्ते मुख्या मुखतो ह्यसृज्यन्तेति तस्मादाग्नेयशब्दः स्तावकः एवमैन्द्रो राजन्यो वैश्वदेवो वैश्य इत्यादिषु द्रष्टव्यं। पंच
दशाधिकरणमारचयति॥ आदित्यो यूप इत्यत्र स्तुतिरादित्यशब्दतः। हुतं चास्य च सारूप्यं घृताक्तेन सेत्स्यतः॥१२॥ आ
दित्ये यूपश्च संगम्यते अग्नित्वेन यूपेण्यक्तिघृताक्तस्य यूपस्य तेजस्वित्वाद्धवलत्वाद्वा तत्र आदित्यशब्देन यूपः स्तू
यते। एवं यजमानो यूप इत्यत्र च स्वर्गमस्योर्ध्वत्वस्य समानत्वात् यजमानशब्देन यूपः स्तूयते षोडशाधि
करणमारचयति अपशवो वा अन्ये गोअश्वेभ्योऽपशवो वा इति श्रुतं। अजादिषु अपशुत्वं यद्गुणवादोऽथवा स्तुतिः॥१३॥ स्तुत्य
भावाद्गुणस्तेषु पशुकार्यनिषेधनं। अजादीनां निषेधस्य यदा यद्यर्थाभिधायिना। पशवो पशुशब्देन प्राशस्त्या
दसाध्यते। अपशुत्वं प्राशस्त्यं तु प्रशंसैव गवाश्वयोः। इदमाम्नायते॥ अपशवो वा अन्ये गोअश्वेभ्यः पशवो गो
अश्वा इति तत्र अजादिषु अपशुत्वं यद्यपशुत्वं न स्यादर्थवादत्वं न संभवति पशुत्वनिषेधमात्रेण स्तुतेरभावात् ततः
पशुकार्यनिषेधरूपो गुणो विधीयत इति चेन्मैवं अजादिपशुविधिवैयर्थ्यप्रसंगेन निषेद्धुमशक्यत्वात् अप
शुशब्दः पशुव्यतिरिक्तघटादिपदार्थमभिदधाति तस्मिन् घटादौ गवाश्ववत् प्राशस्त्यं नास्ति सोऽयं प्राशस्त्याभा

वैश्योऽ

को जातिगुणपशुत्वस्त्रीत्वनेनाभिप्रायेण पशुरेव संज्ञोपपन्ना द्योधरादिस्तस्याः पशुशब्देन लक्ष्यन्ते पूर्वत्र यजमानकार्यसिद्धि
रग्नेये मुखसत्त्व मादित्यस्य वर्द्धते स्वित्वं च यजमानादिशब्दानां प्रस्तराद्यर्थे प्रवृत्तिनिमित्तं तत्सदृशत्वं शिष्टं। प्रस्तरादि प्र
शंसाद्यहत्वपशुशब्दस्याजादिषु प्रवृत्तौ गवाश्वयोः प्रशंसैव निमित्तं फलं च। द्विप्रशंसा कान्ताहि प्रशंसा वस्तुनि विद्यमान
3 गुणोत्कर्षैकः प्रकारः। स्तावकेन शब्देन संपादितो गुणोत्कर्षोऽपरः प्रकारः। गवाश्वयोरजादिभ्यः उत्कर्षो लोकसिद्धोऽयं
सो निमित्तं प्रथमः स्वभावतः पशवो पिसन्तो गवाश्वौ प्रत्यपशव इति संपन्नाः इति गवाश्वयोर्महिमेति स्तुतिः फलं। स्त्रया
द पशवो बाधस्त्वयमर्थवादः अयमेव न्यायमुदाहरणान्तरे पियोजनीयः अयज्ञो वा एष यो सामेत्येकं उदाहरणं अयमत्र
वाएनयद्धद्छंदोमभिस्सप्तमुदाहरणं अग्निहोत्रदर्शपौर्णमासादिर्यज्ञोऽपि सामहीनत्वात् अयज्ञो भवतीदृशः साम्नो
हिमा। छंदोमशब्देन चतुर्विंशश्चतुश्चत्वारिंशोऽष्टाचत्वारिंशदहश्चे तेत्रयस्तोमा उच्यन्ते अक्षरसंख्यासाम्येन गायत्री
त्रिष्टुप्जगतीछंदोभिर्गीयमानत्वात् तेषां च विधृतिः सामब्राह्मणे दृष्टव्या अतः सत्रमपि चतुर्दशरात्रादिकं छंदोम
रहितत्वादसत्रं भवतीदृशः छंदोमानां महिमेत्येवं स्तावकत्वादर्थवादत्वं समदशाधिकरणमारचयति॥ सृष्टी
रुपदधातीति येमन्त्राः सृष्टिलिंगकाः। विधेयास्तेगुणत्वेन वा दो वा प्रगुणे विधिः॥१॥ आख्यातेनाभिसंबंधाद्विध्यं
तरयोगतः। लिंगप्रकरणप्राप्तेर्मंत्राणां विध्यसंभवात्॥२॥ नानन्तरोपचाराधानं विदध्यात्तत्तेषु चेतयत्तः। यथा स्तृष्टिस्य
नेनातः सृष्टीति स्यार्थवादता॥३॥ एवं यासु वनेसादोमे मं चेष्टव चिन्ता हि। सृष्टिशब्दस्तथा प्रयुक्तिः सृष्टिशब्देनन्

मतः ४ अग्निचयने श्रूयते । सृष्टीरुपदधातीति सृष्टिशब्दोपेता मंत्राः या सामान्येष्टका आमुपधाने विधीयंते ताः इष्टकाः सृष्
यइत्युच्यंते । सृष्टिमान् आसामुपधाने मंत्रः इति विगृह्य तद्धिताना सामुपधान इत्यादिव्याकरणसूत्रासिद्धप्रत्यययात
त्रिष्यार्देनात् सृष्टिशब्दोपेता उपधानमंत्रा एवयासृष्टेत्यस्मिन्ननुवाके समाम्नाताः अभूतासृज्यत भूतान्यसृज्यं
तेत्यादिना सृजतिधातोस्तेषु प्रयुक्तत्वात् ते मंत्रा अत्र सृष्टिशब्देनोपधाने गुणत्वेन विधीयंते कुतः उपदधातीत्यने
नाख्यातेनापि संबंधात् न चार्थवादत्वमस्य संभवति विधेयतरणसंदेहे वाक्यत्वाभावादिति प्राप्ते ब्रूमः अग्नि
चयनप्रकरणे पठितत्वात्तेषां मंत्राणां सामान्यतश्चयनसंबंधो गम्यते विशेषसंबंधः सृजतिलिंगादवगं
तव्यः । तथा सति प्राप्तत्वान्न ते मंत्रा अत्र विधीयंते किंतु तान्मंत्राननूद्येष्टकोपधानं विधीयते सृष्टिशब्दे
नानुवादस्तु वक्ष्यमाणार्थवादोपपत्त्यर्थः यथासृष्टमेवावरुंध इति वक्ष्यमाणः अर्थवादः यदि विधिवाक्ये
मंत्राणामनुवादकः सृष्टिशब्दो न स्यात् तदानीमर्थवादे सृष्टशब्दप्रयोगान् विध्यर्थवादयोर्वैयधिकरण्य
प्रसंगः स्यात् तस्मान्मंत्रानुवादी सृष्टिशब्दो न गुणविधायकः । किं त्वर्थवादः ननु प्रथममंत्रे सृजतिधातुर्न प्रयुक्तः
किंतु एकयास्तुवत प्रजा अधीयंतेति तत्साठात्पाठ तथापि छत्रीयत्तीयादिषु बहुषु मंत्रेषु सृजतिधातुप्र
योगाद्भूमरूपस्य दृश्यमस्ति यत्र सर्वालिंगाभावाद्यानि सृष्टिशब्दोपेतानि तत्र यथा सृष्टिभूमता तथा अत्रापी
ति भूमगुणयोगेन सर्वस्य सृष्टिसंघे सृष्टिशब्दप्रयोगः अथादश्रुतच्छिद्रकरणमारचयति सृष्टिवत्प्राणभृत

उपदधाति धातुः प्रयुक्तः
दधात्वर्थकः सृजधातुप्रयुक्त इत्यर्थः

नसारदृश्यं लिंगमस्मतः। अग्नेरिदं मंत्रगोलिंगमस्मवायोर्विशिष्यते २ प्राणमस्तु उपदधातीत्यत्रापि स्पष्टि न्यायेन मंत्रविधिर्वि
तिपूर्वः पक्षः॥ लिंगप्रवरणप्राणमंत्रानुवादे नेष्टकोपधानविधिः एतस्यैव प्राणं दधातीत्यस्य वस्य मार्गार्थवाद
स्योपपत्तये प्राणभक्षकत्वेन मंत्रानुवादः एवं च द्विती यादि मंत्रे पुरस्पष्टि लिंगानां बाधकत्वं इह तु प्रथम मंत्र एव प्राण
गत्लिंगमाम्नायते अयं पुरो भुवस्तस्य प्राणो भौवायन इति एकस्यैव मंत्रस्य प्राणमत्वेपि छत्रिणो गच्छन्तीतिवत्तस्मै
हरिताः सर्वे मंत्राः प्राणमच्छुवेन लक्ष्यंते तदेवं यजमानकार्यस्मिन्नादयो गुणाद्विहितवो निर्णीताः तथा चोक्तं। त
स्मिन्द्वितीयाति सामारूप्य प्रशंसा लिंगभूम्भिः। षड्भिः सर्वत्र प्राणमंत्रो गौणीवृत्तिः प्रकल्प्यितेति। एकोनविंशाधिकरणमार
चयति। शर्करा उपदधाति तेजो वैघृतमतत्रकिं। तैलादिनांजितो तकाघृतेनैवाथवांजनं २ तैलादिनापि मुख्यत्वाद्
संजातविरोधनात् अप्राप्तार्थत्वतश्चास्य विधेर्वादत्वलिंगतः २ सामान्यमननुष्ठेयं विशेषस्तु विधीयते हि। घृतेनैवां
जनं वाक्यशेषात्संदिग्धनिर्णयात् २ अर्थवादगता चेयं स्तुतिर्घृतमुपेयुषी। बोधयंती विशेषत्वं घृतस्यागमयेद्वि
धिं ४ अक्ताः शर्करा उपदधाति तेजो वैघृतमिति श्रूयते मत्ति काभिः शुद्रुणपाषाणाः शर्कराः ताश्च घृतेतैल
वसादीनामन्यतमेन द्रव्येणांजनीयाः कुतः अंजनसाधनसामान्यबोधकस्य विधिवाक्यस्य घृतविशेषबोधकादर्थ
वादात्प्रबलत्वात् तस्मात्स्वल्पेच मुख्यत्वादयस्तयोर्हेतवः स्वार्थतया विधेर्मुख्यत्वं प्रथमश्रुतत्वाद्यासंजातविरोधि
त्वं अनधिगतार्थबोधकत्वादप्राप्तार्थत्वं अर्थवादस्तु विधिस्तावकत्वान्न मुख्यः चरमश्रुतत्वात्संजातविरोधी ज्ञा

31

तार्थानुवादित्वात्स्तावकार्थः । तस्माद्येनकेनांजनमिति प्राप्ते ब्रूमः विधिवाक्येन विहितं जनसामान्यं विधीयते तद्विशेषो वा । नाद्यः सामा
न्यस्याननुष्ठेयत्वात् न द्वितीयः एतत्ते आज्यविशेषवाचकशब्दाभावात् । उत्तरीत्या प्रबलसमविविधिवाक्यमनुष्ठान
योग्यविधिविषे संदेहजनकत्वान्निर्णायकत्वं तु मर्थवादस्यापद्यते । ननु तेन सह विरुध्यते अर्थवादे पि एतस्य विधिनैकवाक्यत्वा इति चेत् न
विधेरुन्नेयत्वात् तेजो वै घृतमित्येवं तेजस्त्वेन घृतस्य स्तूयमानत्वात् घृतेयत्वं गम्यते यस्तूयते स विधीयते इति न्यायात्
तेनच विधेयत्वेन विधायकः शब्दः कल्प्यते घृतेनाक्त इति तस्मात् घृतेनैवांजनं [illegible] भवति ॥ स्रुवेणाथ
स्वधितिनाह स्तेनावद्यतीत्यत्र आज्यमांसपुरोडाशे संकीर्णः । लौकिका व्यवस्थिताः १ व्यवस्थापकशास्त्राहित्यात् स्रुवाद्या
अव्यवस्थिताः ॥ व्यवस्थापकतात्पर्यात्स्तद्विशेन व्यवस्थितिः २ स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यती
ति श्रूयते तत्रावदेयेष्वाज्यमांसपुरोडाशेषु हविःषु स्रुवाद्या अवदानहेतवः सांकर्येण । कुतः व्यवस्थाप
कस्य शब्दस्याभावादिति चेत् मैवं शक्तेर्व्यवस्थापकत्वात् आरब्धानानामर्थं ध्रुवतां शक्तिः सहकारिणीति
न्यायात् द्रवे मुखे कं स्रुवपात्र्यां मुक्तं इत्यत्र लौकिकास्तत्र द्रवं शक्त्यनुसारेण व्यवस्थां कल्पयंतीति कटं आसी
नः कं स्रुवपात्र्यामोदनं निधायेति वेदे व्यंजनलिनासहरू प्रसवंजुह्यादित्यत्रापि द्विहस्तसंयोगांजलि
स्तथापि गुरुदेवतादिप्रसादनार्थांजलिवन्निश्छिद्रसंयोगो न भवति तादृशांजलौ सरक्तेनामवकाशाभावात्
अतः सामर्थ्यात्संयुक्तप्रसृतिद्वयात्मकोमध्यगतावकाशोपेतोंजलिर्गृहीतः एवमन्यत्रापि द्रवद्रव्यस्याज्यस्य स्रु

वो योग्यः। छेद्नीयमांसस्य शस्त्रविशिषं स्वधितिः संहतस्य पुरोडाशस्य हस्तादुस्त्रनेन प्रकारेण स्रुवाद्याः व्यवस्थिताः ॥ ८१

इति माधवीये जैमिनिन्यायमालाविस्तरे प्रथमाध्यायस्य चतुर्थः पादः समाप्तश्चाध्यायः प्रथमः ॥ श्रीः १ ॥